स्वस्त्ययन गण, इन सूक्तों के मंत्रों से आहुतियाँ देवे ॥७॥ "मा नो देवा०" इत्यादि से आहुतियाँ देवे और होमों को संस्थापन करके ॥८॥ स्रुव को धरकर, दधि सत्तू को प्राशन करके आचमन करके जल के पास जावे ॥९॥ "अव्यचसश्च०" इत्यादि का जप करके सावित्री को, "ब्रह्म जज्ञानं०" इस एक ऋचा को और त्रिषप्तीय को पद २ करके बाचें ॥१०॥ शेष अनुवाक का जप करे। जो २ भोग करना हो, उस २ को करे। वह अवश्य ही इस पक्ष को, अपक्षीयमाण पक्ष को नहीं पढ़ते हुए पर्व तक विश्राम करे ॥११॥१२॥१३॥ जब चन्द्रमा फल्गुनी नक्षत्र पर हों तो दो रसों को लाकर "विश्वे देवा०" इत्यादि से अग्नि में आहुति करके ॥१४॥१५॥ रसों में सम्पातों को लाकर होमों को संस्थापन करके ॥१६॥ इसके पश्चात् इन रसों को तीन शिष्यों को प्राशन करावे (मधु, रस,

कर्तव्यो भवति तं तं कुर्वते ॥१८॥ नान्यत अगताञ्छिष्यान् परिगृह्णीयात्परसन्दीक्षितत्वात् ॥१९॥ त्रिरात्रोनांश्चतुरो मासाञ्छिष्येभ्यः प्रब्रूयादर्धपञ्चमान् वा ॥२०॥ पादं पूर्वरात्रेऽधीयानः पादमपररात्रे मध्यरात्रे स्वपन्॥२१॥ अभुक्त्वा पूर्वरात्रेऽधीयान इत्येके ॥२२॥ यथाशक्त्यपररात्रे दुष्परिणामो ह पादः ॥२३॥ पौष्यस्यापरपक्षे त्रिरात्रं नाधीयीत ॥२४॥ तृतीयस्याः प्रातः समासं सन्दिश्य यस्मात्कोशादित्यन्तः ॥२५॥ यस्मात्कोशादुदभराम वेदं तस्मिन्नन्तरवदध्म एनम् । अधीतमिष्टं ब्रह्मणो वीर्येण तेन मा देवास्तपसावतेहेति ॥२६॥ यो यो भोगः कर्तव्यो भवति तं तं कुर्वते ॥२७॥ ये परिमोक्षं कामयन्ते ते परिमुच्यन्ते ॥२८॥३॥१३९॥

घृत,) ॥१७॥ जो २ भोग करना हो, उस २ को भोग करे ॥१८॥ अन्य स्थानों से आये हुए शिष्यों को रसों को प्राशन न करावे क्योंकि उनकी दीक्षा दूसरे आचार्यों से मिली है ॥१९॥ तीन रात न्यून चार मास तक आचार्य्य शिष्यों को प्रवाचन करे या साढ़े पाँच महीने ॥२०॥ रात्रि के पूर्व भाग में एक पाद और आधी रात्रि के पीछे एक पाद पढ़े, रात्रि के मध्य भाग में शयन करे ॥२१॥ विना भोजन किये हुए रात के पूर्व भाग में पढ़े ऐसा किन्हीं का मत है ॥२२॥ यथाशक्ति अपर रात्र में पढ़े, इस समय पाद पढ़ने का परिणाम बुरा होता है क्योंकि पाद दुष्परिणाम है ॥२३॥ पौष्य मास के अपर पक्ष में तीन रात्रि न पढ़े ॥२४॥ तृतीया के प्रातःकाल समास को आरम्भ कर "यस्मात् कोशात्" इस अन्त तक ॥२५॥ "यस्मात् कोशादुदभराम वेदं तस्मिन्नन्तरवदध्म एनम् । अधीतमिष्टं ब्रह्मणो वीर्येण तेन मा देवास्तपसावतेहेति ॥२६॥ यो यो भोगः कर्तव्यो भवति तं तं कुर्वते ॥२७॥ ये परिमोक्षं कामयन्ते ते परिमुच्यन्ते" ॥२८॥३॥१३९॥ यह एकसौ उनतालीसवी कण्डिका पूरी हुई ॥

अथ राज्ञामिन्द्रमहस्योपाचारकल्पं व्याख्यास्यामः ॥१॥ प्रोष्ठपदे शुक्लपक्षे अश्वयुजे वाष्टम्यां प्रवेशः ॥२॥ श्रवणनोत्थापनम् ॥ ३ ॥ संभृतेषु संभारेषु ब्रह्मा राजा चोभौ स्नातावहतवसनौ सुरभिणौ व्रतवन्तौ कर्मण्यावुपवसतः ॥४॥ श्वो भूते शं नो देव्याः पादैरर्धर्चाभ्यामृषा षट्कृत्वोदकमाचामतः ॥५॥ अर्वाञ्चमिन्द्रं त्रातारमिन्द्रः सुत्रामेत्याज्यं हुत्वा ॥६॥ अथेन्द्रमुत्थापयन्ति ॥७॥ आ त्वाहार्षं ध्रुवा द्यौर्विंशस्त्वा सर्वा वाञ्छन्त्विति सर्वतोऽप्रमत्ता धारयेरन् ॥८॥ अद्भुतं हि विमानोत्थितमुपतिष्ठन्ते ॥ ९ ॥ अभिभूर्यज्ञ इत्येतैस्तिसृभिः सूक्तैरन्वारब्धे राजनि पूर्णहोमं जुहुयात् ॥१०॥ अथ पशूनामुपाचारम् ॥११॥ इन्द्रदेवताः स्युः ॥१२॥ ये राज्ञो भृत्याः स्युः सर्वे दीक्षिता ब्रह्मचारिणः स्युः ॥१३॥ इन्द्रं चोपसद्य यजेरंस्त्रिरात्रं पञ्चरात्रं वा ॥१४॥ त्रिरयनमह्नामुपतिष्ठन्ते हविषा च

अब राजाओं के इन्द्र महोत्सव का आचार कल्प को कहेंगे ॥१॥ भादो मास के शुक्लपक्ष में या आश्विन के अष्टमी को प्रवेश करे ॥२॥ और श्रावण मास में उत्थापन करे ॥३॥ सामग्रियों के जुट जाने पर ब्रह्मा और राजा दोनों, स्नान करके अखण्ड नये वस्त्र पहिने हुए, सुगन्धि से युक्त, व्रती, कर्म में उपवास रहते हुए ॥४॥ प्रातःकाल "शन्नो देव्या०" इत्यादि के पादों, आधी ऋचाओं से छः बार जल से आचमन करते हुए ॥५॥ "अर्वाञ्चमिन्द्रं०" से आज्य की आहुति करके ॥६॥ अब इन्द्र को उत्थापन करे ॥७॥ "आ त्वा हार्षं०" इत्यादि से सब ओर अप्रमत्त हो धारण करे ॥८॥ क्योंकि आश्चर्य है उठाये हुए विमान का उपस्थान करना ॥९॥ "अभिभूर्यज्ञ०" इन तीन ऋचाओं के सूक्तों से अन्वारब्ध करके राजा पूर्ण होम करे ॥१०॥ अब पशु के उपचार को कहते हैं ॥११॥ इन्द्र देवता होवें ॥१२॥ जो राजा के नौकर होवें वे सब दीक्षित ब्रह्मचारी होवें ॥ १३ ॥ इन्द्र के पास पहुँच कर तीन रात्रि या पाँच

यजन्ते ॥१५॥ आवृत इन्द्रमहमिति ॥१६॥ इन्द्र क्षत्रमिति हविषो हुत्वा ब्राह्मणान् परिचरेयुः ॥१७॥ न संस्थितहोमाञ्जुहुयादित्याहुराचार्याः ॥१८॥ इन्द्रस्यावभृथादिन्द्रमवभृथाय व्रजन्ति ॥१९॥ अपां सूक्तैराप्लुत्य प्रदक्षिणमावृत्यापउपस्पृश्यानवेक्षमाणाः प्रत्युदावृजन्ति ॥२०॥ ब्राह्मणान् भक्तेनोपेप्सन्ति ॥२१॥ श्वः श्वोऽस्य राष्ट्रं ज्यायो भवत्येकोऽस्यां पृथिव्यां राजा भवति न पुरा जरसः प्रमीयते य एवं वेद यश्चैवं विद्वानिन्द्रमहेण चरति ॥ २२॥४॥१४०॥

अथ वेदस्याध्ययनविधिं वक्ष्यामः ॥१॥ श्रावण्यां प्रौष्ठपद्यां वोपाकृत्यार्धपञ्चमान्मासानधीयीरन् ॥ २ ॥ एवं छन्दांसि ॥३॥ लोम्नां चानिवर्तनम् ॥४॥ अर्धमासं चोपाकृत्य क्षपेरंत्रयहमुत्सृज्य । आरम्भः श्रावण्या-

---

रात पूजा करे ॥ १४ ॥ तीन अयन दिनों का उपस्थान करें आहुतियों से यज्ञ करे ॥ १५ ॥ इन्द्र को घेर, "इन्द्रमहं०" से आहुति करे । "इन्द्र क्षत्रं०" से हवियों को आहुति करके, ब्राह्मणों की परिचर्या करें ॥१६॥१७॥ आचार्यगण कहते हैं कि संस्थित होमों को न करे ॥१८॥ इन्द्र के अवभृथ से इन्द्र के अवभृथ के लिये जावें ॥ १९ ॥ जल सूक्त से स्नान कर, प्रदक्षिण फेरे लगाकर, जल छूकर, नहीं देखते हुए, आवें ॥ २० ॥ ब्राह्मण चाहें उनको देकर उन्हें प्रसन्न करें ॥ २१ ॥ दिन २ इसका राष्ट्र बढ़े, पृथिवी का राजा होवे और बुढ़ापेसे पहिले इसकी मृत्यु न होवे । जो ऐसा जानता है और जो विद्वान् इन्द्र महोत्सव जैसा करता है ॥२२॥४॥१४०॥ यह एकसौ चालीसवी कण्डिका खतम हुई ॥

अब वेद का अध्ययन विधि को कहेंगे ॥ १ ॥ श्रावण की पौर्णमासी या भाद्रपद की पौर्णमासी को वेद का उपाकृत्य (आरम्भ) कर साढ़े पाँच महीने पढ़ें ॥ २ ॥ इसी प्रकार छन्दों को पढ़ें ॥ ३ ॥ लोमों को न कटवावें ॥ ४ ॥ अर्ध मास तक आरम्भ करके तीन दिन पढ़ना बन्द

मुक्तेः पौष्यामुत्सर्ग उच्यते ॥५॥ अथानध्यायान्वक्ष्यामः ॥६॥ ब्रह्मज्येषु निवर्तते ॥७॥ श्राद्धे ॥८॥ सूतकोत्थान-च्छर्दनेषु त्रिषु चरणम् ॥९॥ आचार्यास्तमिते वा येषां च मानुषी योनिः ॥१०॥ यथा श्राद्धं तथैव तेषु ॥११॥ सर्वं च श्राद्धिकं द्रव्यमदसाहव्यपेतं प्रतिगृह्यानध्यायः ॥१२॥ प्राणि चाप्राणि च ॥१३॥ दन्तधावने ॥१४॥ क्षुरसंस्पर्शे ॥१५॥ प्रादुष्कृतेष्वग्निषु ॥१६॥ विद्युतार्धरात्रे स्तनिते ॥१७॥ सप्तकृत्वो वर्षेण विरत आप्रातराशम् ॥१८॥ वृष्टे ॥१९॥ निर्घाते ॥२०॥ भूमिचलने ॥२१॥ ज्योतिषोपसर्जन ऋता-वप्याकालम् ॥ २२ ॥ विषमे न प्रवृत्तिः ॥ २३ ॥ अथ प्रमाणं वक्ष्यामः समानं विद्युदुल्कयोः। मार्गशीर्षपौषमा-घापरपक्षेषु तिस्रोऽष्टकाः ॥२४॥ अमावास्यायां च ॥२५॥ त्रीणि चानध्ययनानि ॥२६॥ जनने मरणे चैव दश-

---

करके, श्रावणी में आरम्भ करना कहा गया और पौष की पौर्णमासी को पढ़ना छोड़ देवें ॥ ५ ॥ अब अनध्यायों को कहेंगे ॥ ६ ॥ ब्रह्मज्यों में छोड़े ॥ ९ ॥ आचार्य सूर्यास्त होने पर या जिनके घर में प्रसव होवे उनको सूतक तक न पढ़ना चाहिये ॥ १० ॥ जैसा श्राद्ध वैसा ही उनके लिये भी ॥ ११ ॥ सब ही श्राद्धिक दशाह तक प्रत्येक गृही को वर्ज्य है ॥१२॥ जीवधारी या अप्राणि हो ॥१३॥ दन्तधावन में, नापित के क्षुर के संसर्ग में, प्रादुष्कृत अग्नि में, आधी रात को बिजुली कड़कने में ॥१४॥१५॥१६॥१७॥ सात वार तक पढ़ने से विरत रहे जब तक प्रातःकालिक भोजन हो ॥१८॥ वर्षा होने में, उल्कापात में, भूमिकम्प में ॥१८॥१९॥२०॥२१॥ ज्योतिष (प्रकाश का छिप जाना) के उप-सर्जन में, ऋतु में भी जब तक काल हो ॥२२॥ संकट में प्रवृत्ति न करे ॥२३॥ अब प्रमाण को कहते हैं। बिजुली एवं उल्कापात में समान दोष है ॥२४॥ अग्रहण, पौष, माघ के अपर पक्षों में तीन अष्टकायें होती हैं ॥२४॥ और अमावास्या में भी ॥२५॥ और तीन ही अनध्याय हैं ॥२६॥

रात्रो विधीयते ॥ आचार्ये दशरात्रं स्यात्सर्वेषु च स्वयोनिषु ॥२७॥ सूतके स्वेको नाधीयीत त्रिरात्रमुपाध्यायं वर्जयेत् ॥२८॥ आचार्यपुत्रभार्याश्च ॥२९॥ अथ शिष्यं सहाध्यायिनमप्रधानगुरुं चोपसन्नमहोरात्रं वर्जयेत्॥३०॥ तथा सब्रह्मचारिणं राजानं च ॥३१॥ अपर्तुदैवमाकालम् ॥३२॥ अविशेषर्तुकालेन सर्वे निर्घातादयः स्मृताः। यच्चान्यदैवमद्भुतं सर्वं निर्घातवद् भवेत्॥३३॥ ऋतावध्यायश्छान्दसः कालप्य आपर्तुकः स्मृतः ॥ ऋतावूर्ध्वं प्रातराशाद्यस्तु कश्चिदनध्यायः। सन्ध्यां प्राप्नोति पश्चिमाम् ॥३४॥ सर्वेण प्रदोषो लुप्यते ॥३५॥ निशि निगदायां च विद्युति शिष्टं नाधीयीत ॥३६॥ अस्तमिते द्विसन्ध्यायां त्रिसन्ध्यायां च पाटवः। अथ तावत्कालं भुक्त्वा प्रदोष

जन्म और मरण में दश रात्रि अशौच होता है, आचार्य के मरण में भी दश रात अशौच होता है, सब ही सगोत्री को अशौच होता है ॥२७॥ तक में एकही न पढ़े, तीन रात उपाध्याय के पास जाना बन्द कर देवे ॥२८॥ आचार्य, पुत्र, उनकी भार्या, इनके पास न जावे तीन रात तक ॥२९॥ अब शिष्य जो साथ पढ़ता है, और अप्रधान गुरु, जो पास रहते हैं उनके पास एक दिन रात न जावे ॥३०॥ उसी प्रकार साथ के ब्रह्मचारी और राजा के पास भी एक दिन रात न जावे ॥३१॥ अपर्तुदैव अर्थात् ऋतु अस्वाभाविक हो एवं दैवी उपद्रव हो तो जब तक अच्छा समय न हो तब तक न पढ़े ॥३२॥ अविशेष ऋतुकाल में सबही को वज्रपात की भांति अपसमय जानना ॥ और भी जितने अद्भुत हैं सबही वज्रपात की भांति हैं ॥३३॥ ऋतु में छन्दों का पढ़ना और कल्प पढ़ना अपर्तु में। ऋतु के पश्चात् प्रातराश तक जो कोई अनध्याय है। सायंकाल होने पर (सायंकाल) ॥३४॥ सबही के मत से प्रदोष काल (रात्रि का आरम्भ) दूषित है ॥ ३५ ॥ रात्रि में निगदा (निःशब्द होने में) काल में, बिजुली कड़कने में न पढ़े ॥३६॥ अस्तमित काल में, दो या तीन सन्धिकाल में न पढ़े ॥ प्रदोष, दोनों सन्ध्या, जल में,

उभे सन्ध्ये ॥३७॥ अप्सु श्मशाने शय्यायामभिशस्ते खिलेषु च ॥ अन्तःशवे रथ्यायां ग्रामे चाण्डालसंयुते ॥३८॥ दुर्गन्धे शूद्रसंश्रावे पैङ्गे शब्दे भये रुते। वैधृते नगरेषु च ॥३९॥ अनिक्तेन च वाससा चरितं येन मैथुनम्। शयानः प्रौढपादो चाग्रतोपस्थान्तिके गुरोः ॥४०॥ विरम्य मारुते शीघ्रे प्रत्यारम्भो विभाषितः ॥ सर्वेणापररात्रेण विरम्य प्रत्यारम्भो न विद्यते ॥ ४१ ॥ पौषी प्रमाणमभ्रेष्वापर्तु चेदधीयानाम् ॥४२॥ वर्षे विद्युस्तनयित्नुर्वा विपद्यते ॥४३॥ त्रिरात्रं स्थानासनं ब्रह्मचर्यमरसाशं चोपेयुः ॥ ४४ ॥ सा तत्र प्रायश्चित्तिः सा तत्र प्रायश्चित्तिः ॥४५॥५॥१४१॥

इत्यथर्ववेदे कौशिकसूत्रे चतुर्दशोऽध्यायः समाप्तः ॥१४॥

॥ इति कौशिकसूत्रं समाप्तम् ॥

श्मशान में, बिछावन (शयन स्थान में) पर, जिस स्थान में शव हो, गली में, जिस ग्राम में चाण्डाल रहता हो, दुर्गन्ध स्थान में, शूद्र के संश्राव में, पैङ्ग के शब्द होने में, भय में, जानवरों के बोलने पर, वैधृत्य में, नगरों में न पढ़े ॥३७॥३८॥३९॥ जिस वस्त्र से मैथुन किया है उसको जल से प्रक्षालन किया और उसी को पहने हुआ हो, सोता हुआ, प्रौढ़ पैरों से गुरु के पास बैठकर न पढ़े ॥४०॥ वायु शीघ्र गति से बहती समय पढ़ना बन्द कर देवे और आधी रात्र के पश्चात् पढ़ना बन्द कर देवे ॥४१॥ पौष में यदि बादल लग जावे और अपर्तु हो तो न पढ़े ॥४२॥ वृष्टि, बिजुली, बादल इनसे विपद् ग्रस्त हो तो न पढ़े ॥४३॥ तीन रात, स्थान, आसन, ब्रह्मचर्य, रसरहित भोजन करके नियमित रहे ॥४४॥ यह उसकी प्रायश्चित्ति है। यह उसकी प्रायश्चित्ति है ॥४५॥५॥१४१॥ यह एकसौ एकतालीसवी कण्डिका खतम हुई।

यह अथर्ववेद के कौशिक सूत्र के ठा० उदयनारायण सिंह मधुरापुर, जिला मुजफ्फरपुर कृत भाषानुवाद का चौदहवाँ अध्याय समाप्त हुआ ॥१४॥

और कौशिक सूत्र भी समाप्त हुआ।

पुस्तक मिलने का पता—

ठाकुर उदयनारायण सिंह, शास्त्रप्रकाश भवन

मु० मधुरापुर, पो० बिद्दूपुर बाजार

जि० मुजफ्फरपुर।

❀ अथ ❀

पण्डित हारिकेशवयोः

संक्षिप्तटीका प्रकाश्यते ।

अथर्ववेदस्य संहिताविधेर्विवरणं क्रियते । तत्र अथर्ववेदस्य नव भेदा भवन्ति । तत्र चतसृषु शाखासु शौनकादिषु कौशिकोऽयं संहिताविधिः । स च गोपथब्राह्मणादर्थवादादि परित्यज्य विधिमात्रं कल्पयित्वा विधेः कृतसूत्रयथोपयोगं टीका क्रियते संहिताविधेः ।

कण्डिका ॥ १ ॥

सू० १ । —अथशब्द आनन्तर्यार्थः । संहिताध्ययनानन्तरं विधेरधिकारः । संहिताविधिं वक्ष्यामः । शान्तिकपौष्टिकाभिचारिकाद्भुतादीनि कर्माणि संहिताविधौ उक्तानि । त्रिविधानि कर्माणि विधिकर्माणि अविधिकर्माणि उच्छ्रयकर्माणि त्रिप्रमाणको विधिः प्रत्यक्षं अनुमानं शब्दं चेति । उपवर्षाचार्येणोक्तम् । मीमांसायां स्मृतिपादे कल्पसूत्राधिकरणे नक्षत्रकल्पो वितानकल्पस्तृतीयः संहिताकल्पश्चतुर्थो अङ्गिरसां कल्पः शान्तिकल्पस्तु पञ्चमः । एते कल्पा वेदतुल्या हि इति भगवानुपवर्षाचार्येण प्रतिपादितं अन्ये कल्पाः स्मृतितुल्याः । प्रागुदग्वा कर्मसमाप्तिर्दैवकर्मसु दक्षिणा प्रत्यग्वा समाप्तिः पितृकर्मसु केचित्प्रागुदगन्तराले समाप्तिः । —सू० १७ । यथा परित्वाग्ने पुरं वयमिति त्रिः पर्यग्नि करोति । कौ० सू० २।१० । —सू० २६ । अग्निं पृष्ठतो नावसेत । —सू०२९।३० । सांख्यायनीये ब्राह्मणे उक्तं द्वे पौर्णमास्यौ द्वे अमावास्ये इति पौर्णमास्याः प्रतिपदिति अमावास्यायां प्रतिपदिति पूर्वा उपोष्या उत्तरा याज्या । कौ० । ब्रा० ३।१ । —सू० ३१ । तिथिभेदे मुख्यपौर्णमासोभेदे या पूर्वा सा उपोष्या । उपवासं करोति ।

कण्डिका ॥ २ ॥

सायंप्रातर्होमवैश्वदेवपिण्डपितृयज्ञादि उद्भृतेऽग्नौ कार्याणि । सू०–१७ । (केशवोऽन्यदपि पठति) ऊर्णाम्रदं —सू० १८ । भूपत इति ब्रह्मावरणं तथा च गोभिलब्राह्मणम्—प्रत्यक्षं वा दर्भमयं वा आसनं वा उदककमण्डलुं वा ब्रह्मस्थापने वा कुर्यात् ।

कण्डिका ॥ ३ ॥

सू० १। —युनज्मि त्वेत्येभिः पञ्चभिरिध्ममुपसमादधाति। द्वितीया कण्डिका। —सू० २। जागृमायनमुदपात्रं कांस्यपात्रमुपसाद्य। —सू० ४। जीवात्थेति सूक्तेन त्रिराचामति। सत्यं बृहदिति नवभिः शन्तिवेत्यृचा उदायुरिति द्वाभ्यामुत्तिष्ठति। (कौ० २४।३१)

कण्डिका ॥ ४ ॥

सू० ९। —उदेनमुत्तरं नयति त्रिभिर्ऋग्भिः प्रजापते न त्वदिति (७।८०।३) चतस्रश्चर्वाहुतीर्जुहोति (कौ० ५।९)। त्वामग्न इत्यृचा (९।५९।१) चतस्र आज्याहुतीर्जुहोति।

कण्डिका ॥ ५ ॥

सू० १३। —स्वाहेष्टेभ्य इत्येवमादिभिरेकादशभिः सर्वप्रायश्चित्तीयाञ्जुहोति "यन्मे स्कन्नं पुनर्मैत्विन्द्रियमिति च द्वाभ्यामृग्भ्याम्"।

कण्डिका ॥ ६ ॥

सू० १०।—केशवः पठति० निसितः। सू० १६।—अगन्म स्वरिति पर्यायद्वयेन। सू० १७।—पत्न्याञ्जलौ। सू० २२।—तस्मान्नादक्षिणं हविःशब्देनाज्यतन्त्रं पाकतन्त्रं चोच्यते। कर्ममात्रमभिमन्त्रणाद्यदक्षिणं न कुर्यात्। पाकतन्त्रे पूर्णपात्रं माणकं सेतिका प्रस्थद्रोणाढकादि। पूर्णपात्रं यजमानशक्त्यपेक्षं "शक्त्या वा दक्षिणां दद्यान्नातिशक्तिर्विधीयते" इत्युक्तं नवमे। आज्यतन्त्रे धेनुः। सू० २६। तथा च ब्राह्मणम्। सू० ३०। आज्यतन्त्रे पाकतन्त्रे दर्शपूर्णमासधर्मा भवन्ति पूर्वतन्त्रं च उत्तरतन्त्रं च सर्वेषु पाकतन्त्रेषु सर्वमाथर्वणं कर्म पाकयज्ञशब्देनोच्यते। सू० ३४।—अत्रापि गोपथब्राह्मणपठितौ श्लोकौ भवतः। सू० ३४।—केशवोऽपि पठति—देवतेति। सू० ३७।—त्वमग्ने व्रतपा असि तृचं सूक्तं कामस्तदग्र इति पञ्चर्चं सूक्तं एते चारणवैद्यानां पठ्यन्ते तस्मिन्नेव तन्त्रे आज्यं जुहोति शान्तसमिधो वा आदधाति सूक्तयोर्विकल्पः। दर्शपूर्णमासव्यतिक्रमे प्रायश्चित्तम्। सर्वत्र कर्मव्यतिक्रमे सर्वप्रायश्चित्तीयान्होमाञ्जुहोति। तस्मिन्नेव तन्त्रे अन्यस्मिन्तन्त्रे वा तन्त्रमध्ये सर्वे होमा इति भद्रमतम्। अथ सर्वार्थाः परिभाषा विधिकर्मार्था अविधिकर्मार्था उच्छ्रयकर्मार्था उच्यन्ते। मेधाजननादिपिण्डपितृयज्ञान्तं यावद्विधिकर्माणि। मधुपर्कादि इन्द्रमहान्तं यावदविधिकर्माणि। पाकयज्ञविधिकर्मसूक्तेन विनियोगं कृत्वा पश्चाद्यां विनियोगस्तान्युच्छ्रयकर्माणि। त्रिविधानि कर्माणि। उपदधातीत्यनादेशे आज्यं समित् पुरोडाशः पयः उदौदनः पायसः व्रीहिः यवः तिलः धानाः करम्भः

शष्कुल्यः एतानि त्रयोदश हवींषि जानीयात् । सर्वत्र इयं पैठीनसिपरिभाषा सर्वत्र हविषां विकल्पः । यत्र गणस्तत्र सर्वत्र सूक्तानां विकल्पः यत्रौषधिगणस्तत्रौषधीनां विकल्पः । हविषां त्वा जुष्टं प्रोक्षामीति सर्वद्रव्येषु प्रोक्षणम् । सर्वत्र उत्पवन हविषामिति युवाकौशिक आचार्यो मन्यते । अवशिष्टानां परिभाषाः पुनरुच्यन्ते सर्वकर्मार्थाः । आज्यतन्त्रादि वैदिकेषु कर्मसु सर्वत्र वृद्धिश्राद्धम् । यत्र उदकेन प्रयोजनं तत्र सर्वत्र शान्त्युदकं कुर्यात् । चतुर्भिर्गणैरेकेन वा गणेन । सूक्तादिग्रहणे सूक्तं जानीयात् । सर्वत्र स्रुवहोमे नित्यं तन्त्रं हस्तहोमे विकल्पेन तन्त्रम् । आज्यतन्त्रे सर्वत्र धेनुर्दक्षिणा हविरुच्छिष्टं च अधिकरणं च । आज्यतन्त्रमुच्यते । अभ्यचसश्च बर्हिर्लवनं वेदिः उत्तरवेदिः अग्निप्रणयनं अग्निप्रतिष्ठापनं व्रतग्रहणं पवित्रकरणं पवित्रेणेध्मप्रोक्षणं इध्मोपसमाधानं बर्हिःप्रोक्षणं ब्रह्मासनं ब्रह्मस्थापनं स्तरणं स्तीर्णप्रोक्षणं आत्मासनं उदपात्रस्थापनं आज्यसंस्कारः स्रुवग्रहणं पुरस्ताद्धोमाः आज्यभागौ अभ्यातानान्तं पूर्वतन्त्रम् । अथ उत्तरतन्त्रमुच्यते । अभ्यातानादि पार्वणहोमः समृद्धिहोमाः स्विष्टकृद्धोमः सर्वप्रायश्चित्तीयहोमाः स्कन्नहोमः पुनर्मैत्विन्द्रियहोमः । स्कन्नास्मृतिहोमौ संस्थितहोमाः चतुर्गृहीतहोमः बर्हिर्होमः संस्रवहोमः विष्णुक्रमाः व्रतविसर्जनं दक्षिणादानं ब्रह्मोत्थापनं यस्मात्कोशादित्येतद् उत्तरतन्त्रम् । उत्तरतन्त्रं समाप्तम् ।

कण्डिका ॥ ७ ॥

परिभाषाव्याख्यानं क्रियते— । सू० ९ । —यथा पिञ्जूलीभिराप्लावयति । घटं वा कांस्यपात्रं वा । सू० ११ । —दूरादेशाद्वृक्षसंभारा आहर्तव्याः । सू० १३ । नित्यनैमित्तिककाम्यानां कर्मणां प्रयोगः । अरण्यं शान्तिकल्पे उक्तम् । यत्र ग्रामशब्दो न श्रूयते तत्रारण्यम् । —सू० १४ । प्रेक्षमाणा—सू० १४ । सर्वहोमकर्म समाप्यते ततोऽवभृथं कुर्यात् । सर्वत्र पुंसवनादिषु संस्कारेषु गृहे प्रयोगः नावभृथ इति रुद्रभाष्यमतम् । सू० १५ । —आश्वयादिषु सर्वत्र संपाताभिमन्त्रणं भवति । सू० १६ । —सर्वे पदार्था अभिमंत्र्य कर्तव्याः । सू० १८ । तं पुरुषं अग्रे कृत्वा गृहे प्रवेश्य ततो मन्थौदनौ प्रयच्छति । (कौशिक ७।७ ।) यथा उतामृतासुः शिवास्त इत्यभ्याख्याताय प्रयच्छति (कौ० ४६।१।) मंत्रेण । —सू० १९ । —यत्र वासितं बध्नाति तत्र सर्वत्र त्रयोदश्यादि भवति । यथा युग्मकृष्णलं वासितं बध्नाति । (कौ० ११।१९।५२।२०)—सू० २० । —मणिं बद्ध्वा तद्दधिमधु आश्नयति । सू० २१ । —अन्वारब्धे यजमाने च कर्तव्याः । अभिमन्त्रणम् । यजमान उत्तरतो भूत्वा दर्भैरन्वारभते । सू० २४ । —समर्थं वृषभचर्म । सू० २६ । —यत्र आप्लवनं अवसेचनं च तत्र आचमनं च भवति । सू० २८ । —समित्सुरोडाशचरुवीहि-

यवतिलादीन्धाभ्याधेयादीनि यजमानं धूमं भक्षयति । सू० २९ । —कर्मसु स्नातौ शुचिना कर्मप्रयोगः । नित्यनैमित्तिककाम्यानि कर्माणि स्नानं कृत्वा प्रयुञ्जीत ।

'कण्डिका ॥ ८ ॥

सू० १ । —सर्वकर्मार्था परिभाषा । अथ निशाकर्मपरिभाषा उच्यन्ते । येषु निशाकर्मसु तन्त्रं तेषु अयं धर्मः । केचित् स्नातोऽहतवसनः प्रयुङ्क्ते इति सर्वार्था परिभाषा मन्यन्ते । —सू० २ । अथ स्वस्त्ययनपरिभाषा उच्यन्ते । स्वस्त्ययनेषु चेज्यानो दिश्यान् बलीन् हरति प्रतिदिशमुपतिष्ठते । येऽस्यां स्थेति सूक्तेन प्रतिदिशं प्रत्यृचं बलिहरणं करोति । प्राचीदिगिति । प्रतिदिशमुपतिष्ठते । यथा उत्तमेन सारूपवत्सस्य रुद्राय त्रिर्जुहोति । (कौ० ५०।१४) तत्र हविरुच्छिष्टेन बलिहरणं कुर्यात् । समाप्ता स्वस्त्ययनपरिभाषा । सू० ५ । —पुनः सर्वार्थाः परिभाषा उच्यन्ते । सर्वत्राधिकरणं कर्तुर्दक्षिणा । हविरुच्छिष्टं आज्यधानी उदपात्रं चर्ममण्डपदर्भसमिधः शान्त्युदकभाजनं स्रुक्स्रुवादीनि देयानि । नित्येषु नाधिकरणमस्ति परद्रव्येषु नाधिकरणमस्ति यथा नापितस्य क्षुरम् । (कौ० ५५।) सू० ६ । —प्रोक्षणाचमनपर्युक्षणादि त्रिः कर्त्तव्यम् । सू० ८ । सर्वत्र शान्तिकेषु शान्तं संभारं दर्भसमिधादि । अभिचारे रौद्रं आङ्गिरसं संभारं (कौ० ४७।२।) सू० ९ । —स्रुक्स्रुवसमिधः काष्ठादि मणिद्रव्यकाष्ठाः कर्तव्यानि । प्रतीकं च द्रव्यञ्च । यथा कथं मह इति मादानकश्रृतं क्षीरौदनमश्नाति । चमसे सरूपवत्सायाः दुग्धे (कौ० १२।१।२।) चमसोऽपि मादानक एव । कथं मह इति उत्तरमपि अनेन सूक्तेन कर्म कुर्यात् । सू० १० विषये यथान्तरम् । मन्त्रद्रव्यसंशये संनिधानं गृहीतव्यं यथा लोमानि हस्तिरोमाणि यथा विघ्ना शरस्येति प्रमेहणं बध्नाति (कौ० २५।१०) सू० १२ । उलूखलमुसलकाष्ठम् । अन्यार्थं इन्धनार्थं काष्ठतक्षणं करोति । सू० १५ । —अथ शान्तवृक्षा उच्यन्ते । स्रग्मालवके प्रसिद्धः । बंधः कान्यकुब्जे प्रसिद्धः । शिरीषो भोजपुरे वाटिकायां प्रसिद्धः । स्रक्त्यस्तिलकः प्रसिद्धः । वरुणो वरुणकः इति आनन्दपुरे प्रसिद्धः । जङ्गिडो वाराणस्यां प्रसिद्धः । कुडको मालवके । गर्ह्यो हिमवति । गलावलस्तत्रैव प्रसिद्धः । स्यन्दनः हिमवति नर्मदायां प्रसिद्धः । अरणिका नर्मदातटे प्रसिद्धः । अश्मयोक्त अश्मन्तको भृगुकच्छे प्रसिद्धः । तुन्युस्तैन्दुका । पूतदारुर्देवदारुर्वैद्यके प्रसिद्धः । समाप्ताः शान्तवृक्षाः । सू० १६ । अथ शान्त्यौषधय उच्यन्ते । चित्तिः प्रसिद्धा प्रायश्चित्तिः पर्वणि पर्वणि तस्याः त्रीणि त्रीणि पात्राणि भवन्ति । शमकानन्दपुरे विश्वामित्रोवाप्याः समीपेऽस्ति । सवंशाधर्मोलिका साम्यवाका काकजंघासदृशा तलाशा वेतसी । वास्तक आटरूषकः (कौ० ३९।६) सीसपात्रं (शीशम) प्रसिद्धम् । शाल्मलिः प्रसिद्धः सिपुनांकरी । आकृतिलोष्टः क्षेत्रमृत्तिका वल्मीकमृत्तिका । एताः सर्वाः

शान्ता ओषधयः शान्त्युदकादौ प्रयोक्तव्याः एतासां समुच्चयः । एतासामलाभे यव-प्रतिनिधिः कार्यः इति पैठीनसिः । शान्त्यौषधिकल्पः समाप्तः । सू० १७ । प्रमन्दोशीरशलल्युपधानं शकधूमा जरन्तः । उपधानं विद्यागन्धुकं शकधूमः ब्राह्मणः एता जरन्त. जीर्णा ग्राह्याः । सू० १८ ।—यत्र सीसानि तत्र एतानि सर्वाणि प्रत्येत-व्यानि । नदीसीसं मदीफेनम् । सू० १९ ।—रसकर्मणि एते रसाः प्रत्येतव्याः समु-च्चयेन ।—सू० २० यवाकस्ति इन्द्रयव । प्रियङ्गुः कंगुणिका । सू० २१ ।— ग्रहणं प्रतीकग्रहणं ग्रहणमनुग्रहणं तावदनुवर्तते यावत्प्रतीकग्रहणं द्वितीयम् । सू० २२ ।—अनुषङ्गः यथार्थं सर्वत्र कर्तव्यः । यथा विश्वा शरस्य पितरं पर्जन्यं शत-वृष्ण्यमिति (कौ० २५।१०) वैदिकं लौकिकमिति भवति कृतयामं कंकतमव-सृजामीति (कौ० ७६।५।६) अनुष्वङ्गः पुनरुक्तमित्यर्थः । सू० २४ ।—अथ चतुर्गणो महाशान्त्याः पठ्यन्ते । सू० २५ ।—अरायक्षयणमिति तिस्रः । १८।३।५

कण्डिका ॥ ६ ॥

सू० १—ये अग्नय इति सप्त ब्रह्मयज्ञानमित्येका । अग्नेर्मन्व इति सप्त मृगार सूक्तानि ग्रहीतव्यानि ॥ सू० २ ।—प्रथमे द्वे उत्तमं वर्जयित्वा शं च नो मयश्च न इत्येका पुनर्मैत्विन्द्रियमित्येका शिवान इत्येका शं नो वातो वातु इत्येका शेषाणि सूक्तानि । अनेन शान्तिगणेन शान्त्युदकं कुर्यात् । सू० ३ ।— यत्र शान्त्युदकं क्रियते तत्र पृथिव्यै श्रोत्रायेति त्रिभिर्ऋग्भिः शान्त्युदकं शान्त्युदकमध्ये प्रक्षिपेत् । अनेनैव कारयिता प्रोक्षणाचमनादीनि प्रत्यृचं करोति । सू० ४ ।— एष शान्ता-तीयो गणः । यत्र शान्तातीयेन प्रयोजनं तत्रायं सर्वत्र प्रयोक्तव्य इति । यथा शान्ता-तीयेन तिलाञ्जुहोति ।—सू० ६ । शान्तिसूक्तानि । इह शान्त्युदके सर्वेषां सूक्तानां समुच्चयः । अन्यत्र सर्वत्र यथोक्तेन न्यायेन विकल्पः न सूक्तविकल्पः । सू० ७ ।— उभयतः शान्तिगणस्य प्रारम्भे समाप्तौ च । सू० ८ ।— अथ शान्त्युदकविधान-मुच्यते । सू० ९ । —अवकरं विसर्जयति । अनुज्ञातः शान्त्युदकं करोति शं नो देवीत्यृचा सावित्री च अम्बयो यन्ति गणेन च शान्त्युदकं करोति लघुगणेन बृहद्गणेन वा चतुर्गणैर्वा । सावित्री शन्नो देवी । ततः पृथिव्यै श्रोत्रायेति त्रिः प्रत्यासिञ्चति शान्त्यु-दके शान्त्युदकं प्रक्षिपति । सू० १० ।— एते चतुर्गणेन बृहद्गणेनैकेन वा शान्त्यु-दकं कुर्वन्ति । शान्त्युदककर्मपरिभाषा समाप्ता । नवमी कण्डिका । तत्र भद्रश्लोकः ।

प्रमाणं पार्वणे चैव प्रकृतित्वात्परीक्षिते ।
परिभाषा च सर्वार्था प्रथमेऽध्याये संहिताविधौ ॥

इति प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः ॥ २ ॥

कण्डिका ॥ १० ॥

सू० २ । —सारिका जिह्वां बध्नाति । सारिका कंटारिका प्रसिद्धा । —सू० २। —कृशो भारद्वाजः॥ सू० ४। —कर्कन्धूः बृहद्बदरी । सू० ६। —ये त्रि षप्ता० इति सूक्तेन क्षीरौदनं संपात्याभिमन्त्र्यभक्षयति । पुरोडाशं भक्षयति । रसान् भक्षयति । रसप्राशनं सर्वत्र त्वे क्रतुमित्यृचा कर्त्तव्यम् । (कौ० २१।२१) सू० ७ ।— ये त्रि षप्ता इति सूक्तेन उपनयनानन्तरं द्वादशरात्रम् । बहुभैक्ष्यमेकत्र कृत्वाभिमन्त्र्य उपाध्यायो ददाति । सू० ८ ।— सुप्तस्योपाध्यायस्य कर्णमनुमन्त्रयते ब्रह्मचारी । सू० ९ ।— यदा यदा उपाध्यायगृहं याति तदा तदा जपति ब्रह्मचारी ॥ सू० १५ ।— उपाध्यायाय । सू० १६ ।— शुक्लपुष्पहरितपुष्पे इति शंखपुष्पिका अन्धपुष्पिका प्रसिद्धे । सू० १७ ।— सम्यक् वर्चस्कामो मेधाकामश्च प्रथमप्रवदस्य । सू० १९ ।— अहं रुद्रेभिरिति शुक्लपुष्पेत्यादि पञ्च कर्माणि आयुष्यकामोऽपि करोति वार्षशतिकं कर्मेति वचनात् । सू० २३ ।— आदित्यमुपतिष्ठते मेधाकामः । सू० २४ ।— निद्रां त्यक्त्वा मुखप्रक्षालनं वर्चस्कामोऽपि करोति ।

कण्डिका ॥ ११ ॥

सू० १ ।— पौर्णमास्यां निर्ऋतिकर्म । (कौ० १८) कृत्वा सकृच्छ्रोभूते साम्पदं कुरुते । सू० ३ ।— ब्रह्मचारिगृहात्'''तृणान्यादधाति । सू० ४ ।— आरण्यपिपीलिकाछिद्रे । सू० ५ ।— संगृह्य स्थाल्यां कृत्वा ग्रामे आगत्य स्थाल्याः सकृज्जुहोति । सू० ६ ।— सप्तसप्तानि ब्रह्मचारिसाम्पदानि शिष्यसम्पत्तिर्भवति । सू० ७ । -पूर्वेद्युर्निर्ऋतिकर्म कृत्वा (कौ० १८) ग्रामसाम्पदानि ग्रामकामो यदा भवति तदा ग्रामसाम्पदं कुरुते । सू० १५।१६ ।— ये त्रिषप्ता इति सूक्तेन पृश्निमन्थो जिह्वाया उत्साद्य भक्षो परिस्तरणमस्रिहं हृदयं दूरिशउपनह्य । सू० १८ ।— पृश्निमन्थं मैश्रधान्यं च दधिमधुमिश्रं कृत्वा अश्नाति । समाप्तः पृश्निमन्थः । सू० १९ ।— युग्मकृष्णलं सुवर्णमणिं । सू० २० ।— सारूपवत्से ओदने पुरुषाकृतिमालिख्य ।

कण्डिका ॥ १२ ॥

सू० १ ।— मृदानककाष्ठश्रुतम् । सू० ४ ।— मन्थान्तानि (कर्माणि)

(कौ०-४-६; ११, १२,— १८) सू० ५ ।- सांमनस्याधिकार आवर्चस्येभ्यः कर्मभ्यो यावत्। जातपुत्रस्य सांमनस्यं क्रियते । यावज्जीवं संजातानां सगोत्राणां सांमनस्यं भवति । सू० ६ ।— उदकुम्भं सम्पातवन्तं कृत्वा ग्रामपार्श्वे भ्रामयित्वा । सू० ८ ।— शुक्त्यानि । अम्लेन रसेन सिक्तानि मांसानि ॥ सू० ९ ।— सहृदयमिति भक्तं सम्पृत्याभिमन्त्र्याशयति । सुरां प्रयच्छति पुरुषेभ्यः त्रैवर्णिकेभ्यः प्रपोदकं प्रयच्छति । सांमनस्यानि समाप्तानि । सू० १० ।— अथ वर्चस्यविधिं वक्ष्यामः । ये त्रिषप्ता इति सूक्तेन औदुम्बरसमिध आदधाति । सर्वत्र वर्चस्कामोऽनुवर्तते आराजकमभ्यो यावत् । (कौ० १४।१) सू० १२ । अथ कुमारीवर्चस्यमुच्यते । कुमारी रूपवती वर्चस्विनी भर्तृगृहे प्रधाना भवति । सू० १६ ।- वैश्यशूद्रानुलोमजाः ।

कण्डिका ॥ १३ ॥

सू०—१।२ । हस्तिवर्चसमिति हस्तिदन्तं दृष्ट्वा उपतिष्ठते । हस्तिदन्तमणिं बध्नाति । हस्तिलोमानि लाक्षाहिरण्येन वेष्टयित्वा बध्नाति । सू०— ४ । कृष्ण, वृष्णि सूक्ताभ्यां मेषनाभिरोममणिं लाक्षाहिरण्येन वेष्टयित्वा बध्नाति । सू० ६ ।— स्नातकादि सप्त मर्माणि स्थालीपाकेन दत्वा । सू० ७ ।- इदं कर्म क्षत्रियादीनां न ब्राह्मणस्य । सू० ११ ।— चन्दनादिगन्धानासाद्य तस्मिन्मध्ये आकाशोदकं प्रक्षिप्य चतुरङ्गुलेन दर्भतृणेनालोड्य । सू० १२।— यस्ते गन्ध इति त्रिभिः राज्ञां समालभते ।

कण्डिका ॥ १४ ॥

अथ राजकर्माण्युच्यन्ते । सांग्रामिकाणां कर्मणां तन्त्रं वक्ष्यामः । अश्वत्थस्य वधकस्य वा अरण्योऽग्निं मन्थति "इन्द्रो मन्थत्वित्यृचा मथ्यमानमनुमन्त्रयते । पूतिरज्जुरित्यर्धर्चेनाग्निपतनस्थाने रज्जुं निदधाति । धूमं पराद्दश्येत्यर्धर्चेन धूममनुमन्त्रयते । अग्निं पराद्दश्येत्यर्धर्चेन जातमग्निमनुमन्त्रयते । एष सेनाग्निः । अव्यचसश्च । बर्हिर्लवनादि समानं सेनाग्निप्रणयनं ग्रहणं पञ्च गृहीतमाज्यम् । अभ्यातामान्तं कृत्वा लोहिताश्वत्थस्य शाखां रोपयति उत्तरतः । ततः प्रधानकर्म कुर्यात् । तत उत्तरतन्त्रे विशेषः । संततिहोमान्तं कृत्वा इमे जयन्तु स्वाहेभ्यः (कौ० १६-१८) इत्येतेन मन्त्रेणाज्यं जुहोति । ततो वधककाष्ठप्रज्वालितेऽग्नौ वामेन हस्तेन इङ्गिडं जुहोति । (कौ० ४७।३१) । पराभिजयान्नादुराहामीभ्यः (कौ० १६।१९) ॐ स्वाहेति । ततः शाखायां दक्षिणतः प्रक्षिपति नीललोहितेनामूनिति मन्त्रेण स्विष्टकृदाद्युत्तरतन्त्रम् । एतत्सांग्रामिकं तन्त्रम् । सांग्रामिकेषु सर्वत्र उच्चैर्मन्त्राणां प्रयोगः । तन्त्र मध्ये ये प्रधानमन्त्रास्ते उच्चैर्भवन्ति । सू०

१।—शत्रोर्हस्तित्रासनानां कर्मणां विधिं वक्ष्यामः । सू० २ ।— तं हन्ति तं संभृति मुखं रथमावर्तयति । सू० ६ ।— ये त्रिषप्ता इति सूक्तेन वेलुकाममिमन्त्र्य यत्र हस्तिनस्तत्राभिमुखो याति । समाप्तानि हस्तित्रासनानि । सू० ७ ।— जयकर्माण्यनुवर्तन्ते । आराष्ट्रप्रवेशकर्मभ्यो यावत् । सू० ८ ।— इध्मसमाधानस्थाने धनुरिध्म आदधाति । धनुस्समिध आदधाति । सू० ९ ।— शरेध्मोपसमाधानं शरसमिधः प्रादेशमात्रीरादधाति । सू० ११ ।— विजयकर्माणि सांग्रामिकाणि समाप्तानि । संग्रामे अयुध्यमाने जयो भवति । एभिः कर्मभिः दृष्टमात्रतः शत्रवः पलायन्ते । सू० १२ ।— इषुनिवारणानि कर्माण्युच्यन्ते । अनेन कर्मणा पुरुषशरीरे इषवो न पतन्ति पार्श्वतो गच्छन्ति । सू० १४ ।— सर्वशास्त्रनिवारणानां कर्मणां विधिं वक्ष्यामः । सू० १५ ।— जुहोति सेनाग्नौ । सू० १६ ।— आरेऽसाविति सूक्तेन शत्रुं दृष्ट्वा जपति । सू० १७ ।— अथ मोहनकर्मणां विधिं वक्ष्यामः । परसेनामोहनानि । सू० १८ ।— ओदनेन फलीकरणं पिण्डीकृत्य । सू० १९ ।— ओदनेन सह कण्डिकां पिण्डीकृत्य । सू० २० ।— शर्कराशूर्पे कृत्वा निष्पुनाति । सू० २१ ।— अप्वा देवता चरुतन्त्रं आज्यभागान्तं कृत्वाग्निर्नः शत्रूनग्निर्नोदूत इति सूक्ताभ्यां (सू० १७) चरुं जुहुयात् । निर्वापे प्रोक्षणे बर्हिर्होमे विशेषः । अप्वा यै त्वा जुष्टं निर्वपामि । अप्वायै त्वा जुष्टं प्रोक्षामि । अप्वां गच्छतु हविः । सू० २२।२३ ।— उद्वेगकरकर्म उच्यते । अजां सितपदां शत्रुसेनां प्रति विसर्जयति । श्वेतेन पादेन अजा वा अविर्वा एणी वा । इत्युद्वेगकरं समाप्तम् । समाप्तानि परस्परोद्वेगकरणानि मोहनस्तम्भनमित्यर्थः । सू० २४ ।— पुनर्जयकर्मोच्यते । सू० २५ ।— स्वसेनारक्षार्थं कर्मोच्यते । स्वसेनां प्रति दिशमुपतिष्ठते । २६ ।— अथ स्वसेनाया उत्साहकरणं वक्ष्यामः । सू० २७ ।— सेनयोर्मध्ये स्थितो जपति निरीक्षमाणः । सू० २८ ।— परसेनायां प्रक्षिपति । उच्छ्वसकः क्रुद्धः । सू० ३० ।— अथ जयपराजयविज्ञानमुच्यते । शरतृणानि । आङ्गिरसेनादीपयति । आङ्गिरसोऽग्निः चाण्डालाग्निः सूतिकाग्निः । सू० ३१ ।— सेनयोर्मध्ये कृत्वा यान् धूमोवतनोति ते जयन्ति यत्र धूमो गच्छति तत्र न जयः ।

कण्डिका ॥ १५ ॥

सू० १ ।— अथ सांग्रामिकं विधिं वक्ष्यामः । जयकर्माण्युच्यन्ते । सूक्ताभ्यामाश्वत्थ्यां पात्र्यां त्रिवृत्तिगोमये परिचयेऽग्निं प्रज्वाल्य हस्तिपृष्ठे शत्रुमभिमुखो गच्छन्नाज्यं जुहोति । पुरुषशिरसि ··· तत्पात्रं प्रक्षिपति भूम्यां । सू० ४ ।— युद्धे मृतस्य पुरुषस्येध्ममुपसमाधाय उपरि चक्रं धारयित्वा दीर्घदण्डेन स्रुवेण । सू० ५ ।— युद्धं योजयेत् । सू० ७ ।— वैश्याय संग्रामविधिं वक्ष्यामः । सू० ८ ।— सेनापतिजयकर्म ···

दण्डनायकजयकर्म । स्वसेनाजयपराजयपुरुषवधशङ्कायां विज्ञानमुच्यते । उदपात्रमभिमन्त्र्यते ततो द्वौ द्वौ योद्धारौ अवेक्षयेद् राजा। सू० १०॥—यं न पश्येत् तं न युध्येत योधयेत् । सू० ११॥—अथ नवरथे घटिते संस्कार उच्यते । सू० १२॥—अथारोग्यविधानमुच्यते । ब्रह्मयज्ञाङ्ग मन्त्राश्चेति। सू० १५॥—अथ सांग्रामिकविधानमुच्यते एका आत्मसेना रज्जुर्द्वितीया मध्ये मृत्युः तृतीया रज्जुः परसेना । एवं संकल्पः । तत अङ्गारेषु निधाय इष्यते यस्य उपरि मृत्युर्गच्छति तस्य सेनाया जयो भवति ॥ सू० १८॥—आरोग्यविज्ञानकर्म । जयविजयपराजयविज्ञानकर्म । एकरज्जुमुख्यमध्यमधरविज्ञानकर्म । एतानि त्रीणि कर्माणि भवन्ति । इषीका शरमया वा वीरिणमया वा कर्तव्या ।

कण्डिका ॥ १६ ॥

सू० १॥—अथ त्रासनं परसेनाविद्वेषणमुच्यते । सू० ३॥—सोमाङ्कुरमणिं बध्नाति । सू० ४॥—राजा त्रिः कण्टकं भ्रामयति । सू० ६॥—जयकाम इदं कर्म कुर्यात् । जयकर्माणि अनुवर्तन्ते अस्मिन्वस्विति राष्ट्रावगमनं यावत् । (सू० २७) सू० ७॥—अभयकर्म उच्यते । सू० ८॥—अभयं द्यावापृथिवी इति सूक्तेन—सप्तऋषीन्यजते प्रतिदिशं सेनायाः । प्रतिदिशं सेनाया उपतिष्ठते वा । श्येनोऽसि गायत्रेति सूक्तेन । सप्तऋषीन्यजते उपतिष्ठते वा सेनायाः प्रतिदिशम् । सू० ९ ॥—उक्तमग्निमन्थनमादौ इन्द्रो मन्थत्वित्यादि । अग्निं मन्थति । सू० १४ ॥—अथ सपत्नक्षयणी कर्म उच्यते । अरण्ये न ग्राममध्ये कुर्यात् । (वधकः) कृमिमालकः । तिर्णिसमिधः । सू० १६ ॥—भाङ्गानि ज्वालानि । सेनाक्रमेषु वपति । सू० १७ ॥—सेनाक्रमेषु वपति । सू० १८॥—स्वाहैभ्य इत्यमित्रेभ्यः । सू० २१॥—आवासानि जयकर्माण्युच्यन्ते । ये बाहव इत्यनुवाकं शुद्धकाले जपति कर्ता । सू० २३ ॥—सर्वत्र पाशेषु अश्वत्थेषु कूटेषु भाङ्गेषु जालेषु वाधकदण्डेषु वज्ररूपेषु पात्रेषु चेङ्गिडालङ्करणे क्रुद्धानुमन्त्रणं कुर्यात् । सू० २४ ॥—त्रिषन्धीनि लोहमयानि···वज्ररूपाणि लोहमयानि अर्बुदिरूपाणि पृषदाज्येन संपात्याभिमन्त्र्य निवपति···सू० २५॥—ये बाहव इत्यनुवाकेन शितिपदं आज्यं पृषदाज्येन सम्पात्याभिमन्त्र्य राज्ञो (राज्ञा राजा वा) दण्डे बध्नाति। सू० २६॥—द्वितीया शितिपदीं···शत्रुसेनां प्रति क्षिपति। शितिपद्योर्द्वयोरण्ये कर्म । सू० २७॥—अथावश्यकं राष्ट्रप्रवेशककर्मविधिं वक्ष्यामः । स्वराष्ट्रे यो निष्क्रान्तः शत्रुणा पुनः प्रवेशमिच्छति तस्येदं कर्म । सू० २८॥—आनुशुष्का लूना व्रीहयः पुनरुत्थिताः छिन्नानि कामानि पुनरुत्थितानि । सर्वस्यामर्दितायां भूमौ पदा निष्क्रान्तो राजा तदा इदं करोति । सू० ३०॥—सेनाकारं पुरोडाशम् । सू० ३१॥—ततो लोष्टेन पूरयेत्···क्षीरौदनं स्थालीपाकं राजानमाशयति ।

कण्डिका ॥ १७ ॥

सू० १ ।—अथ लघु अभिषेककर्मोच्यते। माण्डलिकस्य सामन्तस्य युवराजस्य सेनापतेरन्यस्य कस्यचिदभिषेकः । शान्त्युदकं करोति महानद्या उदकेन च पुष्कराणामुदकं देववृष्ट्युदकं दिव्यमुदकं च । उदकानां विकल्पः समुच्चयो वा । सू० २ ॥—दक्षिणतो वेद्याः ॥ सू० ३ ॥—खट्वायामार्षभं चर्म आस्तीर्यं तत्र राजानमारोहयति। सू० ४ ।—उदपात्रमुभावप्यासिञ्चति। सू० ६ ।—राजा ब्रूते। सू० ७ ।—ब्रह्मा ब्रूयात् ।···सू० १० ।—अभिषेकादनन्तरं घृतावेक्षणमारात्रिकं राजकर्माणि पितृराज्यादीनि कर्माणि प्रत्यहं कर्तव्यानि ॥ सू० ११ ।—महाभिषेकविधिं वक्ष्यामः स सार्वभौमस्य भवति ॥ सू० १६ ।—राजकीयो महाशूद्रः । प्रक्षालनं ददाति । सू० १७ ।—राजा द्यूतक्रीडां करोति ॥ सू० १८ ।—वैश्यः राजानमुपतिष्ठते उत्सृजन्नायुष्मन्निति मन्त्रेण । सू० १९ ।—ततो राजा ब्रूते । सू० २१ ।—राजानमाशयति । सू० २५ ।—राजानमाशयति । सू० २६ ।—स्त्रीणां गृहे याति । सू० २७ ।—तत्र मधुपर्को देयः। महाभिषेकः समाप्तः । अतो भूप्रभृतिराजकर्माधिकारः। घृतावेक्षणम् । पुरोहितकर्म ॥ आरात्रिकं नक्षत्रपूजाग्रहपूजादिकं कर्तव्यम् । सू० ३० ।—शूद्रेणाहृताः समिध आदधाति। सू० ३४ ।—अथ वाचयेदिति विकल्पं मन्यन्ते आचार्याः । समाप्तानि राजकर्माणि । तत्र श्लोकः—

मेधासाम्पदकर्माणि सांमनस्यं च वर्चसाम्पदं
क्रमाच्च राजकर्माणि द्वितीयेध्याये महर्षिणा ।

इति कौशिकपद्धतौ द्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः ॥ ३ ॥

कण्डिका ॥ १८ ॥

अथ निर्ऋतिकर्मणां विधिं वक्ष्यामः । आ पुष्टिकर्मभ्यो यावत् । सू० ११।—प्रदक्षिणं भूत्वा निर्ऋतिदिशमभिमुखो भूत्वा ये त्रिषप्ता इति सूक्तेनाज्यं सकृज्जुहोति। सू० १२ ।—अग्नौ छत्रोपानहौ जुहोति । सू० १४।—धाना शर्करामिश्रान् सकृज्जुहोति । सू० १५ । सह पिटकेन तृतीयामाहुतिं जुहोति । सू० १६ । —काकजङ्घायां लोहकण्टकं बद्ध्वा कण्टके पुरोडाशं बध्नाति तथा निर्ऋत्यभिमुखो भूत्वा प्रयतेत इत्यृचा काकं विसर्जयति । सू० १७ ।—नीलं वस्त्रमधः परिधत्ते रक्तवर्णमुपरि आच्छाद्य शुक्लवस्त्रोष्णीषं कृत्वा या मा लक्ष्मीरित्यृचा लोहखण्डेन सह उष्णीषमुदके

प्रक्षिपति । सू० १८ ।—एकशतं लक्ष्म इत्यृचा रक्तवस्त्रं लोहखण्डेन सहाप्सु क्षिपति । एतां एना इत्यृचा नीलं वासो लोहखण्डेन सहाप्सु क्षिपति । गृहे आगच्छति । ततः कर्माणि कुर्यात् पौष्टिकानि साम्पदानि च । समाप्तानि निर्ऋतिकर्माणि । सू० १९ ।—पूर्वस्य चित्राकर्मादीनि पौष्टिकानि तान्युच्यन्ते आ भैषज्येभ्यः कर्मभ्यो यावत् । (कौ० २५) । एतत्कर्म चैत्र्यां पौर्णमास्यां कुर्यात् । अथवा चित्रानक्षत्रे कुर्यात् । नित्यं चैत्रीकर्म । सू० २२ ।—परशुवन्मुखेनाभ्राति न हस्तेन । सू० २६ ।—मन्थान्तानि कर्माणि । सू० २७ ।—अध्वानं गच्छता पुष्टिकर्माण्युच्यन्ते । सू० २८–२९ ।—यदा गच्छति तदा एतत्कर्म । यदा ग्रामं गच्छति तदा एतत्कर्म कुर्यात् । समाप्तं प्रस्थानकर्म । सू० ३०–३१ ।—यथार्थं याचते तदा द्रव्यकाम एतत्कर्म कुर्यात् । अथवा निष्कामोऽपि करोति । सू० ३२–३४ ।—अथ समुद्रकर्म व्याख्यास्यामः । अभ्यातानान्तं कृत्वा ततश्चत्वारः पूलकाः पलाशसमिन्धनं चत्वारो दर्भपूलका व्यतिषङ्गेण जुहोति । एकं समिद्धारकं द्वितीयं तस्योपरि दर्भभारकं पुनरपि तथैव च अष्टौ उपर्युपरि कृत्वा ततो ब्रह्मजज्ञानेन सहस्रधारेणाज्यं जुहोति । सू० ३७–३८ ।— सात्रिकस्याग्नेः प्रणयनम् । अथवा सत्रस्थाने प्रणयनम् । अथवा सत्रस्थाने एतत्कर्म करोति धनधान्यपुत्रलक्ष्मीयशोमेधाधर्मकामः । आयुर्बलप्रजासम्पद् ग्रामकूपादि···सम्पद्यते समुद्र इत्याक्षते कर्मेतिवचनात् ।

कण्डिका ॥ १९ ॥

सू० १–२ ।—अथ गवां रोगेषु गवां पुष्टिप्रजननेषु शान्तिरुच्यते । बहुदुग्धा गावो भवन्ति ज्वरगण्डमालादिरोगे एतत्कर्म गर्भग्रहणार्थमेतत्कर्म भवति । सू० ३ ।–तडागमवरुह्य ततो गाः पाययति । समाप्तानि गवां पुष्टिकर्माणि । सू० ४ ।–सर्वार्थानि पुष्टिकर्माण्युच्यन्ते । द्वाभ्यां महानदीभ्यामुदकमाहृत्य सर्वत उपसिच्य । सू० ७ ।—अथ लक्ष्मीकर्म व्याख्यास्यामः । यस्य गृहे लक्ष्मी नास्ति तस्य गृहात् । सू० ८ ।—श्रीमतीगृहात् गोमयमाहार्यं...। सू० ९ ।– अथ समुद्रे इदं कर्म क्रियते पुष्टिकर्म । अलक्ष्मीविनाशककर्माण्युच्यन्ते । शापेटमालिप्याप्सु निविध्य तत्राग्निं प्रणीय । शेरभकेति सूक्तेन भक्तं सम्पात्याभिमन्त्र्याश्नाति...पुष्ट्यर्थी । सू० १० ।—कण्डितयवानाम् । सू० १४ ।–बोष्ठकर्मणां विधिं वक्ष्यामः । सू० १८ ।–गोवाटे पांसुकूटं कृत्वा अर्धं दक्षिणेन निक्षिपति । सू० २० ।—चतुर्थे उत्खाय...अभ्राति । सू० २२–२३ ।—अथ सर्वकाममणिशान्तिरुच्यते । पालाशमणिं त्रिवासितं कृत्वा सम्पात्याभिमन्त्र्य बध्नाति त्रयोदश्यादयस्तिस्रो दधिमधुनि वासयित्वा परिभाषावचनात् । (कौ० ७।१९।) पलाशादि चतुर्षु मणिषु संबध्यते पुष्टिकामः । तिलकमणिं, वरणमणिं, खदिरपलाशमणिं बध्नाति । सू० २६ ।—पलाशमणिं बध्नाति । सू० २७ ।—

समाप्ता मणिबन्धनशान्तिः। सू० २८।—अथ अष्टकाकर्म पुष्टिकामो वा नित्यं वा··· कुर्यात्। माघाष्टकायां पूर्वाण्हे यज्ञोपवीती शालानिवेशनं समूहयति॥ उपवस्त्र-मक्तमशित्वा स्नातोऽहतवसनः प्रयुङ्क्ते रात्रौ वशातन्त्रं पाकयज्ञविधानं धानादीनां श्रपणं कृत्वा। तत आज्यभागान्तं कृत्वा ततः पुरस्तादग्नेः प्रतीचीं गां धारयन्ति। पश्चादग्नेः प्राङ्मुख उपविश्य अन्वारब्धाय शान्त्युदकं करोति। प्रथमां ह व्युवास सेति सर्वेण तिस्रः पश्चादाहुतीर्जुहोति। सू० २९।—ततः प्रथमा ह व्युवास सेति सूक्तेन सर्वेण स्थालीपाकं जुहोति।

कण्डिका ॥ २० ॥

सू० १।—कृषिनिष्पत्तिकर्म वक्ष्यामः। क्षेत्रे गत्वा। सू० ४।—हालिको अन्यांश्चतुरो वृषभान्युनक्ति षड्द्रवं हलमिति वचनात्। सू० ५।—लोहफालमभि-मन्त्र्य हले प्रतिकर्षति। सू० ७।—अपूपानभिमन्त्र्य हले फालमुखे ददाति। ततः कर्ता हलेन कृषति। सू० ८।-हालिकाय। सू० ९।–तिस्रः सीताः प्राचीर्हालिकः कृषति। सू० १४–१५।–उदपात्रे निदधाति। तेनोदकेन हलं सर्वमनक्ति। सू०-१६-१९।– यत्र सीता सम्पातिता तस्मात्स्थलात् मृत्तिकां पत्नी गृह्णाति हस्तेन। अतोऽन्यो मनुष्यः पृच्छति किमाहार्षीः?। ततः पत्नी ब्रूते वित्तिं भूतमिति। सू० २०।– मृत्तिकां निदधाति पत्नी। सू० २१।—ततो लोहफालं घृतेनाभ्यज्य तत्रैव क्षेत्रे निदधाति। सू० २२।—सीताशिरः सूत्रेषु। सू० २३।— एकैकस्याः सीताया दक्षिणे चमसे रसान् प्रक्षिप्य मध्यमेषु विरूढं निदधाति पुरोडाशमुत्तरेषु निदधाति। सू० २४।— चमसोपरि दर्भाग्रान्निदधाति ततः चमसान् पांसुना प्रच्छादयति मृत्तिकां ददाति तत्र। ततः प्रभाते अवश्यं तस्मिन् क्षेत्रे द्वितीयेऽहनि कर्षितव्यम्। एतत्सर्वं एकं कर्म। कृषिभ्यः निष्पत्तिकर्म समाप्तम्। सू० २४।—अथ वृषभ-लाभकर्म उच्यते। सू० २५।—आनडुहसांपदकर्म समाप्तम्।

कण्डिका ॥ २१ ॥

सू० १।—अथ स्फातिकरणकर्म उच्यते। सू० ५–६।—यदा यदा भक्तं राध्यते तदा तदा अभिमन्त्रयते। यदा दीयते कण्डेन। ... निष्पवने रन्धने परीक्षणे दाने च सर्वत्राभिमन्त्रणम्। सू० ७।—स्थिरधान्यमक्षयं भवति। समाप्तानि स्फाति-करणानि पुष्टिकर्माण्येव वर्तन्ते। सू० ८।—सन्ध्याकाले॥ सू० ९॥—यदा प्रथमं होममिच्छति तदा इदं कर्म करोति। सू० ११।—सूर्यस्य रश्मीनन्विति तिसृभिर्द्वादश नाम्न्यां बध्नाति। इह वत्सां निबध्नीम इति पादेन वत्सां बध्नाति। अयं घासं इति पादेन घासं ददाति गोभ्यो वा वत्सेभ्यश्च। समाप्ता गोशान्तिः। सू० १२।—वत्स-साम्पदानि कर्माण्युच्यन्ते। सू० १३।—सूत्रेण परिवेष्ट्य घृतेनाक्ता आदधाति।

सू० १४ ।—इषीकाः तिस्रो मधुना चिकसेन प्रलिप्ता आदधाति। सू० १५-१६ ।—ज्येष्ठेन पुत्रेण सह भागविधिं वक्ष्यामः । उत पुत्र इत्यृचा गृहकाष्ठकाद्या अभिमन्त्र्य ततो गृहं कारयेत् पुष्टिकामः पुत्रो वा साम्पदं करोति पिता वा करोति । सू० १७ ।—आर्द्रपाणिभूर्त्वा शान्तशाखयाँ ऋचं जपित्वा पुत्रं पिता पुत्रभागं प्रयच्छति । सू० १८-१९ । प्राग्भागमपाकृत्य पुत्रस्य गृहे गोधनं बध्नाति । अग्निसंमुखं कुरुते । पुत्रस्य भागं क्रियते । सू० २० ।—आग्नेया अमावास्या भविष्यति तस्यां पुत्राश्च भ्रातरोऽपि अनेन विधानेन भागं कुर्वन्ति । समाप्तं विभागकर्म । सू० २१।२३ ।—त्वे क्रतुमित्यृचा सर्वत्र रसप्राशनं परिभाषा सर्वस्मिन्नथर्ववेदे रसकर्मसु पाकयज्ञविधानेन प्रजापतये चरुं श्रपयित्वा। स्तुत्व वर्ष्मन्निति ऋचा जुहोति पुष्टिकामः । अमावास्यायामस्तमिते रात्रौ वल्मीके दर्भानास्तीर्य तत्र दीपं ददाति ।

कण्डिका ॥ १२ ॥

सू० १ ।—पुनः पुष्टिकर्माण्युच्यन्ते । भ्रष्टपिष्टं सक्तुम् । सू० ६ ।—क्षेत्रकामस्य कर्म उच्यते । यत्र क्षेत्रं कामयते तस्मिन् क्षेत्रे इदं कर्म कुर्यात् । सू० ७ ।—सप्त ग्रामलाभकर्म । सू० १० ।—अथ समृद्धिकर्म उच्यते । सू० १० ।—उदक्याम् । सू० १४ ।—अथ समुद्रकर्म उच्यते। शम्बुदेशे गत्वा गार्हपत्यदक्षिणाग्न्याहवनीयेषु कर्म कुर्यात् । ततो गार्हपत्ये अभ्यातानान्तं कृत्वा ममाग्ने वर्चं इति सारूपवत्सं गार्हपत्यश्रृतं गार्हपत्ये प्रथमं संपात्य ततो दक्षिणाग्नितन्त्रं कृत्वा पूतीकैस्तरणम् । तत अभ्यातानान्तं कृत्वा तमेव सारूपवत्सं सम्पात्य तत आहवनीयभागस्तरणम् । ततस्तमेव सारूपवत्सं संपात्यानेनैव सूक्तेन ततः पश्चात्सकृदभिमन्त्रणं कृत्वा ततोऽश्नाति । गार्हपत्यप्रभृति उत्तरतन्त्रं कुर्यात् । अशनं गार्हपत्यदेशे करोति । उत्तरतन्त्रम् । व्रतग्रहणादि करोति। दक्षिणाग्न्याहवनीयगार्हपत्येषु यथाक्रमं व्रतग्रहणादि। गार्हपत्यस्य दर्भैस्तरणं दक्षिणाग्नेः पूतिकैः । आहवनीयस्य भाङ्गाभिः । समाप्तं समुद्रकर्म ।

कण्डिका ॥ २३ ॥

सू० १ ।—अथ नवे गृहे अग्निशालायां गोशालायां वा ग्रामे वा पुरे वा अन्यत्राभिततेषु वा कर्माणि । पाषाणमये वा काष्ठमये वा तृणमये वा इष्टकामये वा सर्वत्र नवे वासिते इदं कर्म । सू० ६ ।—तूष्णीमादौ वाग्यमनं कृतमिहैव स्तेति वाग्विसर्गः । सू० ७ ।—अग्नौ रविकां औदुम्बरं दत्वा आज्यं जुहोति । धूमं नियच्छति । लेपं प्राश्नीयात् । सू० ९ ।—दायादेषु विभागकर्म वक्ष्यामः । सू० १२ ।—अथ चित्राकर्म चित्रानक्षत्रे उच्यते । संभारान् संपातयति । वृक्षशाखा । उदकम् । करम्बकम् । औदुम्बरशकलम् । ताम्रच्छुरिका । सू० १४ ।—वत्सकर्णं छिनत्ति ।

सू० १५।—कर्णलोहितम्। रसमिश्रितः अश्नापयति पुष्टिकामः। सू० १७।—अथ कृषिकर्म उच्यते।

कण्डिका ॥ २४ ॥

सू० १–२।—बीजवापनं कर्म करोति। केदारे वा क्षेत्रे निवपति। त्रीन् मुष्टिबीजस्य। ततः पांसुभिराच्छादयति। सू० ३–६।—उच्चस्थाने गत्वा। ततः अभ्यातानान्तं कृत्वाभित्यमिति चतुर्ऋचेन सूक्तेनोदपात्रं सम्पात्य तदुदपात्रं सोमरसमिश्रं सारूपवत्सं ओदनं सम्पात्याभिमन्त्र्याश्नाति। तत उत्तरतन्त्रं प्राग्द्वारप्रत्यग्द्वारे मण्डपे एतत्कर्म। पश्चान्मण्डपमग्निना दहति। सू० ७।—एकवारप्रसूता गौर्गृष्टिः। गोदाममणिं बध्नाति पुष्ट्यर्थी। सू० ८।—अश्नाति पुष्ट्यर्थी। सू० ९।—इत्यृचा वपवा वृषभस्येद्रं यजते वशाविधानेन (कौ० ४४) सू० १६।—अथ प्रवत्स्यत एकाग्निकस्य इदं कर्म कथ्यते। इहैव स्तेति गृहं मानुष्यांश्चावेक्षते। सू० १८।—अथ प्रवेशाय यजमानो यदा आगच्छति तदा इदं कर्मोच्यते। मौनं कृत्वा समिधमादाय गृहं दृष्ट्वा ऊर्जं बिभ्रदिति षडर्चं सूक्तं जपति। वामेन हस्तेन समिधः कृत्वा दक्षिणेन शालावलोकं संस्तभ्य जपति ऊर्जं बिभ्रदिति। ततः समिध आदधाति अग्नौ। सुमङ्गलीति कल्पजेन स्थूणे गृह्णात्युपतिष्ठते। यद्वदामीत्यृचा वाग्विसर्गं करोति। गृहपत्न्यासाद उपविश्योदपात्रं निनयति तूष्णीं दूर्वाग्राणि अङ्गुलिकायां कृत्वा पूर्वापरमिति षडर्चं सूक्तं जपति। अमावास्यायां केचिच्चन्द्रमसं दृष्ट्वा जपं कुर्वन्ति पुष्टिकामाः। सू० १९।—अथ वृषोत्सर्गविधिं वक्ष्यामः। ऋषभं सम्पात्य विवाहवदग्निपरिणयनं कृत्वा सह वत्सरीभिः विसर्जयति। सू० २२।—अत एकादशाहे वृषभं करोति तदा शान्त्युदकं कृत्वा वृषोत्सर्गं करोति। वृषोत्सर्गः समाप्तः। वृषभपुच्छं गृहीत्वा देवपितृषिभ्योऽहं ददे ऋषभमुच्चारयति। सू० २४–२५।—अथाग्रहायणीकर्म उच्यते। रात्रौ अभ्यातानान्तं कृत्वा त्रयश्चरवः श्रपयितव्याः। सत्यं बृहदित्यनुवाकेन पश्चादग्नेर्दर्भेषु खदायां भूमौ एकं चरुं सकृत् सर्वहुतं जुहोति। सू० ३१।—सत्यं बृहदिति नवभिः शान्ति द्वेति दशम्या। सू० ३६।—सत्यं बृहदित्यनुवाकेन कृषिकर्म आयोजनकर्म भवति। सू० ३७।—यस्यां सदो हविर्धाने इति तिसृभिराज्यं जुहोति। तत उत्तरतन्त्रम्। वरो म आगमिष्यतीति वरस्य प्रार्थितोऽभिलाषः उत्कृष्टपुत्रधनादि वा सर्वफलकामः। सू० ३८।—उपतिष्ठते पृथिवीं पुष्टिकामः। सू० ३९। निधिं बिभ्रतीति द्वाभ्यामुपतिष्ठते पृथिवीं मणिहिरण्यद्रव्यनिधिरत्नकामः। सू० ४१।—वृष्टिकाले यस्यां कृष्णमिति नवोदकमभिमन्त्र्याचमनं करोति पुष्टिकामः। यस्यां कृष्णमित्यृचा नवोदकमभिमन्त्र्य स्नानं करोति पुष्टिकामः। नवोदकस्य

कर्म समाप्तम् । सू० ४५ ।—सर्वे मंत्राः पुष्टिकर्मसु पठिताः तृतीयेऽध्याये तेषामुपधानमुपस्थानं भवति । एते मन्त्राः पौष्टिकाः पौष्टिकानां सर्वेषां मन्त्राणां हविरुपधानमुपस्थानं वा करोति विकल्पेन । सू० ४६ ।—ततः श्लोकः ।

पूर्वं नैर्ऋतिकर्माणि सर्वेषां पापनुत्तये ।
पौष्टिकानि ततः पश्चात्तृतीये संहिताविधौ ॥

इति कौशिकपद्धतौ तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः ॥ ४ ॥

कण्डिका ॥ २५ ॥

सू० १—३ ॥ भेषजशान्तिर्भैषज्यशब्देनोच्यते । तत्र द्विविधा व्याधयः आहारनिमित्ता अन्यजन्मपापनिमित्ताश्च । तत्राहारनिमित्तेषु चरकवाहडसुश्रुतेषु··· व्याध्युपशमनं भवति । अशुभनिमित्तेषु अथर्ववेदविहितेषु शान्तिकेषु व्याध्युपशमनं भवति । तथाचाग्रे वक्ष्यति । अनूक्तान्यप्रतिषिद्धानि भैषज्यानामंहोलिङ्गाभिः (कौ० ३२।२६।२७) सर्वाणि कर्त्तव्यानि । उक्तान्यनूक्तानि च कर्त्तव्यानि । बन्धनपायनादीनि च कार्याणि । सू० ५ ॥—मुखवलीर्विमार्ष्टि अङ्गवलीश्च । तरुणस्य यदि वलयस्तदा एतत्कर्म । सू० ६ ॥—अथ ज्वरातिसारभैषज्यान्युच्यन्ते । मुञ्जपुष्पमणिं मुञ्जरज्ज्वा बध्नाति । सू० ७ ॥—अतिसारे चातिमूत्रे च भैषज्यम् ।·····। सू० ८ ॥—अपानं ग्रक्षति । सू० ९ ॥—अपाने शिश्नं वा नाडीं वा व्रणमुखं धमति अतिसारे । समाप्तानि ज्वरातिसारे अतिमूत्रे अङ्गनाडीग्रवाहे च भैषज्यानि । सू० १० ॥—अतिदुःखमूत्रे दुःखपुरीषकरणे च शमनभैषज्यान्युच्यन्ते ।····· विद्मा शरस्येति द्वितीयेन हरीतकीं कपूरं वा सम्पात्याभिमन्त्र्य बध्नाति । सू० १२ ॥—विषितं ते बस्तिबिलमिति द्वाभ्यामृग्भ्यां मूषिकमृत्तिकोपरि उपविश्य जपति । तृणोपरि उपविश्याभिमन्त्रयते ।·· बस्तिबिलमुखमभिमन्त्रयते । दारुतक्षशकलान् दधिमथितोपरि उपविश्य ततोऽभिमन्त्रयते ।····· जरत्प्रमन्दोपरि उपविश्याभिमन्त्रयते ।··· दारुतक्षशकलानामुपरि उपविश्य व्याधितं ततोऽभिमन्त्रयते मूत्रादिप्रतिबन्धे मूत्रं मुच्यतामिति लिङ्गात् । सू० १३ ॥—व्याधितमारोहयति । सू० १४ ॥—व्याधितः शरं प्रक्षिपति । सू० १५ ॥—शरशिश्नमभिमन्त्र्य निष्फोटति शिश्नं चर्मणो निःसारयतीत्यर्थः । सू० १६ ।—लोहशलाकामभिमन्त्र्य शिश्ने प्रवेश-

यति । मूत्रप्रवाहं विदारयति । सू० १७ ।—विद्मा शरस्येति द्वितीयेन द्रप्सीं ज्याधनुषं जघने शिश्नदेशे ऊर्ध्वंकृत्वा गोदोहन्यामुदकं कृत्वा यवानेकविंशतिं प्रविश्य प्रक्षिप्य तेन उदकेन धनुषमुपरिफलं सिञ्चति सूक्तं जपित्वा ॥ यथा उदकं शिश्ने पतति तथा कार्यम् । सू० १८ ।—यवगोधूमवल्लीपद्ममूलं यातिका एतानि क्वाथयित्वाभिमन्त्र्य व्याधितं पाययति । समाप्तानि मूत्रप्रतिबन्धे दुःखमूत्रकरणे दुःखपुरीषकरणे···उदरपूर्णनिरोधकरणे च एतानि भैषज्यानि कार्य्याण्यारोग्यकामः । सू० २० ।—अथ सर्वरोगभैषज्यान्युच्यन्ते । अभ्यातानान्तं कृत्वा अग्न आयन्तीति वायोः पूत इति सूक्तेनाज्यं जुहोति । पलाशोदुम्बराद्याः समिध आदधाति । सर्वव्याधिभैषज्यकामः । सू० २१ ।—अथ सोमभक्षणे भैषज्यमुच्यते । सोमपवने सोमरसायने सोमपाने सोमाभिषवे च सोमविषये व्याधौ उत्पन्ने भैषज्यं समाप्तम् । सू० २२ ।—अथ भूततन्त्रकर्माण्युच्यन्ते । भूतपिशाचशङ्कायां शान्तिरुच्यते । कुक्कुसाज्जुहोति । तुषाज्जुहोति । बुसं जुहोति । काष्ठशकलानि जुहोति । (कौ० १४। १५ ।) अभेयाध्येयानां धूमं नियच्छति । पिशाचगृहीतपुरुषं धूमं पाययति । गृहे ग्रामे वा पत्तने क्षेत्रे वा देवगृहे वा यत्र क्वचित् पिशाचशङ्कास्ति तत्र होमं कृत्वा धूमं नियतं कुर्यादित्यर्थः । पिशाचगृहीतं पुरुषमन्वाह आक्रोशं ददाति । सू० २३ । —कर्कटिकासमिध आदधाति । मुसलकाष्ठशकलानि जुहोति । खदिरसमिध आदधाति । सर्षपसमिध आदधाति । सू० २४ ।—खदिरवितस्तिमात्रशङ्कून् सप्त वा नव वा अभिमन्त्र्य पश्चादग्नेर्निखनति । भूमिं समां करोति । अक्ष्यौ निविध्य इत्यृचा निखननमन्त्रः पिशाचोपद्रवे । सू० २६ ।—शर्करानभिमन्त्र्य शयनं वा अन्तराणि वा गृहं वा परिकिरेत् रक्षोभये । सू० २७-२९ ।—अमावास्यायामभ्यातानान्तं कृत्वा शरमयं बर्हिस्तृणाति सर्षपेध्मानामुपसमाधानम् । सकृद्गृहीतान्यवसक्तूञ्जुहोति । एतस्मिन्तन्त्रे यवराशिमध्यात् मुष्टिमेकां गृहीत्वा उलूखलेन अप्रदक्षिणं पिष्यते ततो व्याधितं सम्पात्य शणसूत्रेण जिह्वामार्जनं करोति । ततो ग्रहणमुक्तो न करोति शणेन जिह्वामार्जने ततो न गतो ग्रह इति विजानीयात् । सू० ३० ।—अथ ग्रहाभिचार उच्यते । इदं कर्म अवश्यमस्य ग्रहस्य वशीकरणमुच्यते । पलाशपुटेन जुहुति । सू० ३१-३३ ॥ अथास्मिन् गृहे पिशाचोऽस्ति वा न वास्ति संशये इदं कर्मउच्यते । सर्षपेध्मं शरमयं बर्हिरभिमन्त्र्य शालाया उपरि निदधाति । ततः प्रभाते निरीक्षणं विकृते पिशाचशङ्का । तदा उक्तो होमः । वीरिणतूलमित्यादि । (सू० ३० ।) ॥ ३४ ॥ पिशाचगृहीतं पुरुषम् । सू० ३५-३६ ।—रात्रिकर्माण्युच्यन्ते ।—रात्रौ उलूमुके अभिमन्त्र्य परस्परं संघृष्यति । ततः प्रभाते स्वस्तिदा इति सूक्तेन प्रक्रामति पदानि ददाति । रक्षोभैषज्यम् । समाप्तानि रात्रिकर्माणि । सू० ३७ ।—अथ जलोदरभैषज्यमुच्यते । घटे दर्भपिञ्जूलीः प्रक्षिप्य

एकविंशति गृहतृणानि च प्रक्षिप्य तं घटमभिमन्त्र्य ततो व्याधितं सिञ्चति । ततो मार्जनञ्च दर्भत्रयमेकत्र बद्धं पिञ्जूलीत्युच्यते । समाप्तं जलोदरभैषज्यम् । अभ्यासेन कर्मसिद्धिः दिने दिने कुर्यात् जलोदरनाशनार्थम् ॥

कण्डिका ॥ २६ ॥

सू० १ ।—अथ वातपित्तश्लेष्माणि भैषज्यान्युच्यन्ते । मांसमेदोऽभिमन्त्र्य पाययति वातविकारे । मधु अभिमन्त्र्य पाययति श्लेष्मविकारे । घृतमभिमन्त्र्य पाययति वातपित्तसहविकारे । तैलमभिमन्त्र्य पाययति वातश्लेष्मविकारे । सू० २-६ ।—अतिकाशे शीर्षक्ति शिरोवेदनायां च कर्माण्युच्यन्ते । व्याधितं शिरं मौञ्जवेष्टितं कृत्वा वामेन हस्तेन वपनं जालसहितं गृहीत्वा जरायुज इति सूक्तेन लाजान् प्रकिरन् व्रजति व्याधिदेशं यावत् । तत्रैव मुञ्जप्रश्नं लाजाश्च वपनानां प्रक्षेपः । वामेन हस्तेन वपनं मौञ्जं इन्दुकं च गृहीत्वा दक्षिणेन हस्तेन ज्यां द्रुप्तीं गृहीत्वा...व्याधितमग्रे कृत्वा यत्र व्याधिरुत्पन्ना तत्र स्थाने गत्वा जरायुज इति जपित्वा मौञ्जप्रश्नं वपनं क्षिपति व्याध्युत्पत्तिस्थाने ज्यां तूष्णीं प्रक्षिपति । वातज्वरे कटिभङ्गे शिरोरोगे च वातगुल्मे वातविकारे च सर्वरोगे च भैषज्यम् । ध्रुनुर्वाते अङ्गकम्पने वाते शरीरभङ्गे सर्ववातविकारे भैषज्यम् । सू० ८ ।—घृतमभिमन्त्र्य नासिकानस्तं दद्यात् । सू० ९ ।—जरायुज इति सूक्तेन पञ्चपर्ववेणुदण्डं ललाटे संस्तभ्य जपति शिरोरोगे कटिभङ्गे वा वातगुल्मे विकारे च । लिङ्गथुपतापः समाप्तः । सू० १० ।—अथ लोहितं वहति शरीरमध्ये बहिश्च । कर्माण्युच्यन्ते । पञ्चपर्ववेणुदण्डं रुधिरवहनस्थाने दत्वा "असूर्या" इति सूक्तं जपति । रथ्यायाः पांसून् गृहीत्वाभिमन्त्र्य रुधिरव्रणे विकिरति । सू० ११ ।—अर्भकपालिकां बध्नाति । केदारमृत्तिका इति । सू० १२ ।—अर्भकपालिकामभिमन्त्र्य पाययति । अर्भकपालिकां शुष्कपङ्कमृत्तिकाम् । स्त्रीरजसोऽतिप्रवर्तने भैषज्यं रुधिरप्रवाहे च । सू० १४ ।—अथ हृद्रोगे कामले चेत्यादिभैषज्यान्युच्यन्ते । सू० १६-१७ ।—अनुसूर्यमिति सूक्तेन गोरक्तचर्मच्छिद्रमणिं गोदुग्धे तं दत्त्वा संपात्याभिमन्त्र्य बध्नाति दुग्धं च पाययति । अभ्यातानाद्युत्तरतश्चम् । कामले हृद्रोगे चेत्यादि लिङ्गथुपतापः । सू० १८ ।—हरिद्रौदनं व्याधितस्य भोजनं दत्वा तस्योच्छिष्टं चानुच्छिष्टं चैकत्र कृत्वा तेन च उद्वर्तनं कृत्वा शिरःप्रभृत्यारभ्य यावत्पादौ उद्वर्त्य ततो व्याधितं च खट्वायामुपवेश्य खट्वाधस्तात् शुकां काष्ठमुसुकं च गोपितिलकां च एते त्रयः पक्षिणः सव्यजङ्घायां हरितसूत्रेण बद्ध्वा खट्वाधस्ताद् बध्नाति ।.....अपस्मारे भैषज्यम् । उदकमभिमन्त्र्य व्याधितं स्नापयति । सू० १९ ।—मन्थमभिमन्त्र्य प्रपाद्य प्रयच्छति भक्षार्थम् । सर्वत्र गृहद्वारे अग्रे व्याधितं कृत्वा तमग्रे प्रवेश्य स्वयं प्रविश्य ततो भक्तमभिमन्त्र्य

व्याधिताय प्रयच्छति । सर्वत्र यत्र यत्र प्रयच्छतिशब्दस्तत्र तत्रैव बोद्धव्यम् । (कौ० ७।१८) सू० २० ।—अनुसूर्यं इति सूक्तेन शुष्कचन्दनमभिमन्त्रयेत् । काष्ठ-शुष्कचन्दनमभिमन्त्रयेत् । गोपीतिलकां-यस्मिन्कस्मिंश्च दृष्ट्वा वदन्तीं तत्राभिमन्त्रयते व्याधितः । सू० २१ ।—वृषभहृदयलोमभिः सुवर्णवेष्टितं मणिं कृत्वा सम्पात्याभि-मन्त्र्य व्याधिताय बध्नाति । समाप्तानि अपस्मारविस्मयहृद्रोगकामलकरोहिणकानि भैषज्यानि । सू० २२ ।—अथ श्वेतकुष्ठभैषज्यान्युच्यन्ते । श्वेतकुष्ठं गोमयेन प्रघृष्य यावल्लोहितं दृष्ट्वा भृङ्गराजहरिद्राभ्यां इन्द्रवारुणीनीलिकापुष्पा एताः पञ्च पिष्ट्वाभिमन्त्र्य कुष्ठं प्रलिम्पति । सू० २३ ।—पलितानि छित्त्वा घृष्ट्वा अवलिम्पति । सू० २४ ।—अथ मारुतान्युच्यन्ते । समाप्तानि कुष्ठभैषज्यानि श्वेतपलितनाशनं दुर्भिन्ननाशनं च । सू २५ ।—अथ ज्वरभैषज्यमुच्यते । नित्यज्वरे वेलाज्वरे सतत-ज्वरे एकान्तरितज्वरे चातुर्थिकज्वरे च ऋतुज्वरे च । सू० २६ ।—अथोद्वेगविनाश-भैषज्यान्युच्यन्ते । सू० २८ ।—उप प्रागादिति सूक्तेन उलूमुकद्वयमभिमन्त्र्य घृषीयत रात्रौ उषाकाले एतत्कर्म । तथा प्रभाते स्वस्तिदा इति सूक्तेन दक्षिणेन पादेन प्रक्राम-तीति (कौ० ५०।१।) स्वस्त्ययनम् । वृद्धबालयुवस्त्रीपुरुषाणामकस्मादुद्वेगः प्रलापो वा भवेत्तदा एतत्कर्म कुर्यात् । सू० २९ ।—गन्धर्वराक्षसेऽप्सरसे भूतग्रहादिषु भैषज्यान्युच्यन्ते । सू० ३० ।—चतुष्पथे व्याधितं कृत्वा ततः प्रज्वालिताग्नौ घृताक्ताः सर्वौषधीर्जुहोति । सू० ३१ ।—व्याधितस्य वल्मीकां सर्वौषधिसहितां हस्तेन कृत्वा नदीमुखसंमुखां प्रविश्य नदीमध्ये वल्मीकायां सर्वौषधिं घृताक्तां हुत्वा । ततः प्रक्रामति । उदकमध्ये सर्वौषधीर्जुहोति घृताक्ताः । पश्चात्स्थितो व्याधितं सिञ्चति । सू० ३२ ।—ततो मृण्मये आमपात्रे होमशेषाः सर्वौषधीः कृत्वा पक्षिणो यस्मिन् वृक्षे वसन्ति तत्र त्रिपादे कृत्वा बध्नाति । सू० ३३–४० ।—अथ लौकिके शापे वैदिके शापे च स्त्रीणामाक्रोशे च पुरुषाणाञ्च भैषज्यमुच्यते । सर्वस्मिन् संहिता-विधिकर्मणि प्रधानकर्ममध्ये नवं घटं यत्प्रथममास्थापितमुत्तरतस्तेनोदकेन हिरण्य-वर्णा इति सूक्तेन अभिमन्त्रितेन कारयिताभिषेचयेत् । सर्वत्र मेधाजननादिकर्मसु । ततः पश्चान्मणिबन्धनादिकर्म कुर्यात् । भैषज्येष्वभिषेकं न कुर्यात् । अभ्यातानान्तं कृत्वा अघद्विष्टा इति सूक्तेन यवमणिं सम्पात्याभिमन्त्र्य पुनः सूक्तं जपित्वा बध्नाति । लौकिके आक्रोशे वैदिके च ब्राह्मणस्य शापे आक्रोशे च क्रूरचक्षुर्दृष्टिनिपाते च पिशाच-रक्षादिषु भैषज्यं समाप्तम् । अथ रक्षोग्रहे भैषज्यमुच्यते । आज्यतन्त्रं कृत्वा शं नो देवीति सूक्तेन पृश्निपर्णीमोषधिं पिष्ट्वा सम्पात्याभिमन्त्र्य पुनः सूक्तं जपित्वा शरीरं प्रलिम्पति । अभ्यातानाद्युत्तरतन्त्रम् । पापगृहीते च स्त्रीगर्भस्रावे च मृतापत्यायां च क्रव्याद्गृहीते च पिशाचगृहीते च रक्षोभयभैषज्यं समाप्तम् । अथ राजयक्ष्मादि-भैषज्यमुच्यते । तन्त्रं कृत्वा वरणोवारयता इति तृचेन वरणवृक्षमणिं बध्नाति ।

राजयक्ष्मादिपूगव्याधिषु श्वेतोदुम्बरकुष्ठाद्यष्टादशजातिषु ज्वरादिसर्वरोगेषु भैषज्यं समाप्तम् । अथ वातविकारे भैषज्यमुच्यते। पिप्पलीक्षिप्तभेषजीमिति सूक्तेन पिप्पलद्रव्यं आशयति । वातविकारे धनुर्वातगुल्मे वातशूले क्षिप्तवातप्रदोषे कर्मकृते वाते उत्पन्ने सर्वव्याधिविकारे भैषज्यं समाप्तम् । जलोदरे भैषज्यमुच्यते । विदध्रस्य बलासस्येति तृचेन सूक्तेन व्याधितस्य मूर्धनि सम्पातानानयति। सर्वव्याधिविसर्पणे प्रकोपे च बलासे च आन्त्रविसर्पणे च अक्षिविसर्पणे च विद्रधिविसर्पणे च हृदयामये च अज्ञातराजयक्ष्मणि च एतेषां भैषज्यं समाप्तम् । या बभ्रव इति सूक्तेन दश वृक्षशकलानि लाक्षाहिरण्येन वेष्टितं मणिं कृत्वा...बध्नाति। सर्वव्याधिभैषज्यं समाप्तम् । सू० ४१ ।—अथ क्षेत्रियव्याधिभैषज्यमुच्यते । क्षेत्रियो व्याधिर्लिङ्गी पितृपर्यागतः क्षेत्रियरोगः कुष्ठक्षयरोगः ग्रहणीदोषः सर्वशरीरविस्फोटकारः । सू० ४३ ।—बभ्रोरर्जुनकाण्डस्येत्यृचा अर्जुनकाष्ठं यवबुसं तिलपिञ्जिकां च एकत्र त्रीणि बद्ध्वा बध्नाति । आकृतिलोष्टं जीवकोषण्यां बद्ध्वा बध्नाति । वल्मीकमृत्तिकां जीवकोषण्यां बद्ध्वा··· बध्नाति । जीवतः पशोश्चर्म जीवकोषणोत्युच्यते ।

कण्डिका ॥ २७ ॥

सू० ३।४ ।—शालातृणानि गर्त्ते प्रक्षिप्य तस्मिन् गर्ते व्याधितमुपवेश्य तत आचामयति···अवसिञ्चति । समाप्तं क्षेत्रियस्य भैषज्यम् । सू० ५ ।—अथ ब्रह्मग्रहे भैषज्यमुच्यते । दशवृक्षेति सूक्तेन वृक्षविकल्पेन पलाशादिदशवृक्षशकलानि गृहीत्वा लाक्षाहिरण्यवेष्टितं मणिं कृत्वा बध्नाति । सू० ६ ।--दश ब्राह्मणा अथर्वाङ्गिरसः सुहृदो दशवृक्षेति सूक्तं जपन्तो व्याधितं शरीरमभिमृशन्ति । सू० ७ ।—पुनः क्षेत्रियभैषज्यान्युच्यन्ते । सू० ९ ।—उदकतृपाक्रान्तभैषज्यमुच्यते । सू० १३ ।--सवासिनाविति सूक्तेन मन्थघटमभिमन्त्र्य पाययति व्याधिताव्याधितौ एकवस्त्रपरिहितौ सन्तौ । सू० १४–१७ ।--अरुषो उदरगण्डुलकभैषज्यान्युच्यन्ते । इन्द्रस्य या महीति सूक्तेन कृष्णचणकान् घृतमिश्राञ्जुहोति ॥ गोवालचित्रितं शरसंध्यं परिवेष्टय पाषाणेन चूर्णयति । अग्नौ प्रतपति। ततः सूक्तान्तेऽग्नौ आदधाति । सू० १८ ।-सव्ये हस्ते पांसून् कृत्वा दक्षिणेन विमृज्य दक्षिणामुखः स्थितः सूक्तं जपित्वा व्याधितस्योपरि किरति । अरुषो गण्डुलकानां भैषज्यम् । सू० १९ ।—पांसून् मर्दयति हस्ताभ्यां व्याधितः । सू० २० ।—पलाशोदुम्बराम्राः समिध आदधाति । समाप्ता उदरकृमयः उदरगण्डुलकाश्च दृष्टकृमयश्च तेषां सर्वेषां भैषज्यम् । सू० २१ ।—अथ गोकृमिभैषज्यान्युच्यन्ते । सू० २६ ।—उद्यन्नादित्य इति सूक्तेन घृतमिश्रान् कृष्णचणकाञ्जुहोति । उद्यन्नादित्य इति सूक्तेन शरगोवालवेष्टितं धारयति पाषाणेन । सू० २७–२८ ।-सर्वव्याधिभैषज्य-

मुच्यते । आज्यतन्त्रं कृत्वा व्याधितं पर्वसु बद्ध्वा अक्षीभ्यां त इति सूक्तेनोदपात्रं सम्पात्य ततः पुनः सूक्तं जपित्वावसिच्य व्याधितस्य पर्वग्रन्थिर्विमुच्यते । तत उत्तरतन्त्रम् । समासमक्षिरोगनासिकाकर्णशिरोजिह्वाग्रीवाराजयक्ष्मादि सर्वभैषज्यम् । सू० २९ ।—हरिणस्येति सूक्तेन हरिणशृङ्गमणिं···बध्नाति ॥ हरिणशृङ्गेन सहोदकं आचामयति । अथोषाकाले एतत्कर्म । हरिणचर्मशङ्कुधानं प्रज्वाल्योदकेन प्रक्षिप्य ततो व्याधितमवसिञ्चति । सू० ३२ ।—बालरोगगृहीते च मैथुनदोषभैषज्यान्युच्यन्ते । पूतिगन्धमत्स्यसहितमोदनं व्याधिताय प्रयच्छति भक्षणार्थम् । सू० ३३ ।—अरण्यतिलैः प्रज्वालितमुदपात्रमभिमन्त्र्य प्रक्षिपति उषाकाले । अवसिञ्चति व्याधितम् । मैथुनराजयक्ष्मणि भैषज्यम् । अरण्यशणेन अरण्यगोमयेनावज्वालितमुदकमभिमन्त्र्यावसिञ्चति । उषाकाले मार्जनाचमनम् । चित्यादिभिः प्रज्वालितमुदकमभिमंत्र्य व्याधितमवसिञ्चति । मार्जनाचमनं च । केचित्तिलशणादिचतुर्षु कर्मसु अरण्ये अवसेकमिच्छन्ति । केचिद् गृहे अवसेकमिच्छन्ति । सू० ३४ ।—अथ सर्वभैषज्यान्युच्यन्ते । आ गाव इति दशभिः सूक्तैः मुञ्जशीर्षक्त्या इत्यृचा घटमुदकपूर्णं संपात्याभिमन्त्र्य व्याधितमवसिञ्चति ॥

कण्डिका ॥ २८ ॥

सू० १ ।—स्कन्दविषभये भैषाज्यान्युच्यन्ते । तक्षकदेवतायै नमस्कारं कृत्वा ततो ब्राह्मणो जज्ञे वारिदमिति सूक्ताभ्यां उदकमभिमन्त्र्य आचामयति । संप्रोक्षति विषदुष्टं । सू० २ ।—क्रमुकवृक्षशकलं सहोदकमभिमंत्र्य तत आचामयति··· अभ्युक्षयति दूर्वावज्वालितमुदकमभिमन्त्र्यावसिञ्चति । जीर्णहरिणचर्मावज्वालितमुदके प्रक्षिप्य तमभिमन्त्र्य ततोऽवसिञ्चति । मार्जालिकावकरतृणैरवज्वालितमुदकमभिमन्त्र्यावसिञ्चति । सू० ३ ।—उदपात्रं सम्पात्य तत आप्लावयति विषदुष्टं विषलिप्ताभ्यां सक्तुमन्थमुपमथ्य ततोऽभिमन्त्र्य पाययति । मदनफलानि प्रत्यृचं भक्षयति यथा च छर्दयति तथा च कर्त्तव्यम् । सू० ५ ।—शस्त्राद्यभिघाते रुधिरप्रवाहे भैषज्यान्युच्यन्ते । रोहिण्यसीति सूक्तेन लाक्षोदकं कथितमभिमन्त्र्य व्याधिदेशमवसिञ्चति ॥ उषाकाले कर्म । अस्थिभङ्गे रुधिरप्रवाहे शस्त्राभिघातादौ भैषज्यम् । सू० ७ ।—रक्षोभैषज्यमुच्यते । सदम्पुष्पा सन्ध्या प्रसिद्धा । सू० ८ ।—अथ सर्वव्याधिभैषज्यमुच्यते ॥ भवाशर्वौ मन्वे वामिति सूक्तेन । सू० ९ । सर्वभूतग्रहभैषज्यमुच्यते । शमीपर्णचूर्णं शमीफले कृत्वाभिमन्त्र्य सक्तुमध्ये ददाति भक्षार्थं रक्षोग्रहभैषज्यम् । सू० १० ।—शमीचूर्णं शमीफले कृत्वाभिमन्त्र्यालङ्कारे ददाति । सू० ११ ।—शमीचूर्णं शमीफले कृत्वाभिमन्त्र्य व्याधितस्य शालां चूर्णैः परिकिरति । सू० १२ ।—अमतिगृहीते पुरुषे भैषज्यमुच्यते । प्रज्ञानष्टे अज्ञानगृहीते अधर्मगृहीते त्रिवर्गे च

विनष्टे द्यूतक्रीडाद्यतिप्रवृत्ते कुबुद्धिभैषज्यम् । सू० १३ ।--राजयक्ष्मणि शिरोरोगे कुष्ठमये सर्वगात्रवेदनायां भैषज्यमुच्यते । यो गिरिष्वजायत इति सूक्तेन । अश्वत्थ देवसदन इति द्वे गर्भोऽसीति तृचेन च कुष्ठपिष्टं नवनीतमिश्रमभिमन्त्र्य अप्रतिहारं व्याधितशरीरं प्रक्षिप्यति । सू० १४ ।--अथ शस्त्राभिघाते भैषज्यमुच्यते । रात्री मातेति सूक्तेन । दुग्धलाक्षां क्वाथयित्वाभिमन्त्र्य पाययति । शस्त्राभिघाते काष्ठाभिघाते पाषाणपतनाभिघाते अग्निदग्धे सर्वशरीराभिघाते भैषज्यं समाप्तम् । सू० १५ ।—सूतिका स्त्री अरिष्टकस्य भैषज्यान्युच्यन्ते । ब्रह्मयज्ञानमनाप्ता "ये सहस्रधार एष ते इति सूक्तेन भक्तमभिमन्त्र्य ददाति भक्षणार्थम् । सू० १६।—समाप्तं स्त्रीप्रसवदोषे सूतिकारोगे च भैषज्यम् । अद्भुतदर्शने दोषनाशनभैषज्यं समाप्तम् । सर्वाद्भुतेषु भक्तकर्म वा मन्थकर्म वा आचमनकर्म वा कुर्यात् । यानि चरकादिवैद्यकेषु अद्भुतानि पठ्यन्ते तेषां सर्वेषामियं शान्तिभैषज्यं भवति । सू० १७ । अथ सर्वव्याधिभैषज्यान्युच्यन्ते । सू० १९ ।—द्वौ सम्पातौ भूमौ दत्वा ततः सम्पातितां भूमिमृत्तिकां गृह्य तत उदपात्रे प्रक्षिप्य व्याधितमाप्लावयति ।

कण्डिका ॥ २९ ॥

सर्वविषभैषज्यमुच्यते । सू० २–४॥–यत्ते अथोदकमित्यृचा अप्रदक्षिणं परिक्रामति व्याधितम् । विषस्तम्भनभैषज्यम् । शिरसि शिखां बध्नाति ।'' श्वेतवस्त्रेण ग्रन्थिं बध्नाति ।''शणस्तम्बे ग्रन्थिं बध्नाति । विषं न विसर्पति देशस्थितं भवति शरीरे न सर्पति विषस्तम्भनं भवति॥ सू०५।—वृषामेरव इत्यृचा । यस्मिन् स्थाने दष्टं तं स्थानं न पीडयति । ऋचं जपित्वा दंशाद्विषमन्यत्र गच्छति । विषशासने भैषज्यम् ॥ सू० ६ ।—चक्षुषा ते चक्षुरित्यृचा आचार्यस्ततः प्रदक्षिणं परिक्रामति । अपेह्यरिरसीत्यृचं जपित्वा तृणानि प्रज्वाल्य ततो अह्यभिमुखं प्रक्षिपति । सू० ७ ।—अपेह्यरिरित्यृचं जपित्वा यतो दष्टस्ततो ज्वलिततृणानि क्षिपति दर्शनेन । सू० ८ ।—कैरातपृश्न इत्यृचा उदकं गृहतृणावज्वालितमभिमन्त्र्य व्याधितं पाययति प्रोक्षति च । सू० ९ ।—असितस्य तै मातस्येति ऋचा आर्लोज्यापाशं संपात्याभिमन्त्र्य बध्नाति आलिगी च विलिगी च उरुगूलाया इति च द्वाभ्यां मधुमक्षिकां मधुवृक्षमृत्तिकामभिमन्त्र्य पाययति । सू० १४ ।—अलाबुवृत्तं सम्पात्याभिमन्त्र्य बध्नाति । सू० १५ । अथ दुष्टवक्तॄणां मुखस्तम्भनमुच्यते । एका च मे यद्येकवृषोऽसीति सूक्ताभ्यां कलापपच्छूवां मधूदकं च एकत्र कृत्वा व्याधितं पाययति । दुष्टवक्तृमुखबन्धनभैषज्यम् । दुष्टपुरुषबन्धनम् । परोक्षेण वदन्ति । सू० १६ ।—यद्येकवृष इति सूक्तेन भोजनमभिमन्त्र्य भक्षयति शापभैषज्यम् । सू० १७ । यद्येकवृष इति सूक्तेन गृहद्वारमभिमन्त्र्य ददाति अपिदधातीत्यर्थः । सू० १८ ।—अथ ज्वरभैषज्यमुच्यते । सू०

१९ ।–अग्निस्तक्मानमिति सूक्तेन । ताम्रस्रुवेण मूर्ध्नि संपातानानयति। तत उत्तर-तन्त्रम् । एकस्मिन् तन्त्रे दावाग्निप्रणयनम्। सू० २० ।—अथ कृमिभैषज्यमुच्यते । करीरमूलं सम्पात्याभिमंत्र्य बध्नाति । गोबालैः करीरकाष्ठं वेष्टयित्वा सूक्तं जपित्वा पाषाणेन चूर्णयति । ततः सूक्तेनाग्नौ प्रतपति । ततः सूक्तेनादधाति । सू० २४ ।—एकविंशत्युशीराणां मूलान्यभिमन्त्र्य ततः पाषाणेन क्रुदयति ततः सूक्तं जपित्वा उशीराण्यग्निना दहति । सू० २६ ।—एकविंशत्युशीरपिञ्जूली-सहितं सम्पात्याभिमन्त्र्य ततो व्याधितमाघ्रापयति । सू० २७ ।—अथ राक्षस-भैषज्यमुच्यते ।—वयोनिवेशनकाष्ठश्रृतम् । सू० २८ ।—अथ सर्पविषभैषज्यमुच्यते। सर्पविषलिङ्गथुपतापः । सू० ३० ।—श्लेष्मभैषज्यमुच्यते । उदकेन इदं क्रियते । अप्स्विदं कृत्वा तत्राग्निं प्रज्वाल्य । अस्थिस्रंसमिति सूक्तेन काष्ठशकलं संपात्य ततः शकलेन सम्पातवतावसिञ्चति व्याधितम् ॥

कण्डिका ॥ ३० ॥

सू० १।२ ।—अथाक्षिरोगे भैषज्यमुच्यते । सर्पपकाण्डमणिं संपात्याभि-मंत्र्य बध्नाति सर्षपतैलेन सम्पातवन्तं करोति। आज्येन प्रधानं अङ्गानि सर्षपतैलेना-भ्यज्य मणिं वा ततो बध्नाति । सू० ३ ।—सर्षपशाकं सर्षपतैलेनाभ्यक्तमभिमन्त्र्य व्याधिताय प्रयच्छति । सू०५।–मूलक्षीरं मुखेन प्राश्य ततोऽभिमन्त्र्य अङ्क्ते अक्षिणी व्याधितस्य । मूलक्षीरं क्षीरपाटिकालग्नं तदुच्यते । सू० ६ ।—मूलक्षीरं भक्षयति । सू० ७ ।–पित्तज्वरभैषज्यमुच्यते । ताम्रस्रुवेण मूर्ध्नि संपातानानयति । अस्मिन् तन्त्रे दावाग्निप्रणयनं कुर्यात् । सू० ८ ।—अथ केशवृद्धिकरणे केशपतने भैषज्य-मुच्यते । वृक्षभूमिजातौषधीभिरवज्वालितमुदकमभिमंत्र्यावनक्षत्रेऽवसिञ्चति सू० ९ ।–मधु क्वाथयित्वा विभीतकं क्वाथयित्वाभिमन्त्र्य व्याधितमवसिञ्चति । सू० १० ।–दारुहरिद्रा हरिद्रे च द्वाभ्यां क्वाथयित्वाभिमन्त्र्यावसिञ्चति । सू०११ ।—अथ उदरतुण्डभैषज्यमुच्यते । कृष्णं नियानं सस्रुरिति सूक्ताभ्यां चित्त्याद्योषध्या सहित-मुदकमभिमन्त्र्य ततो व्याधितमवसिञ्चति । सू० १२ ।—कृष्णं नियानं सस्रुषो-रितिसूक्ताभ्यां मरुतो यजते पाकयज्ञविधानेन यथा वरुणम् । मारुतं क्षीरौदनं मारुतश्चतम् । सू० १३ ।·····अथ हृदयदग्धे जलोदरे कामले च भैषज्यान्युच्यन्ते। नद्युदकमनुलोममाहार्यं तत्र वलीकतृणानि प्रक्षिप्य व्याधितमवसिञ्चति । सू० १४ ।—अथ गण्डमालाभैषज्यमुच्यते । पञ्च च या इति सूक्तेन गोपाशूलिकां पञ्चाशत्पंचाशत्यधिकाअग्नौ प्रज्वाल्य अधस्तादयः समिध आदधाति ।

कण्डिका ॥ ३१ ॥

सू० ४ ।—पुरोडाशं···पयो जुहोति । व्रीहीन् । आवपति शान्तवृक्षसमिध

आदधाति । रक्षोग्रहभैषज्यम् । सू० ५ ।—अथ सर्वभैषज्यमुच्यते । वैश्वानरो न ऊतये ऋतावानं वैश्वानरमिति सूक्ताभ्यां उदपात्रमभिमन्त्र्य पाययति । सक्तुमन्थं पाययति । हरिद्रां सर्पिषि पाययति । अप्सु घृतमुदकमभिमन्त्र्य पाययति । सू० ६ ।—अपवादे भैषज्यमुच्यते, बहुभाषणमधर्मे च प्रवर्तते तस्यापवादः । अभ्यातानान्तं कृत्वा अस्थाद् द्यौरिति पूर्वेण स्वयंपतिते गोशृङ्गे उदकं कृत्वाभिमन्त्र्याचामयति अभ्युक्षति च । सू० ७ ।—अथ उदरे वा हृदये वाङ्गे वा सर्वाङ्गे वा शूले उत्पन्ने भैषज्यमुच्यते । या ते रुद्र इति सूक्तेन शूलमणिं संपात्याभिमन्त्र्य बध्नाति । शूलं लोहमणिः पाषाणो वा दारिलरुद्रमतम् । यां ते रुद्र इति व्याधितमभिमन्त्रयते रुद्रभाष्यमतम् । शूलभैषज्यं समाप्तम् । सू० ८ ।—रक्षोग्रहे भैषज्यमुच्यते । उत्सूर्यं इति चित्याद्योषधीभिः सहोदकघटमभिमन्त्र्य व्याधितमवसिञ्चति । शम्युदकेन सह अवसिञ्चति । शमीबिम्बमुदकसहितं अवसिञ्चति शीर्षपर्णीमुदकं दत्त्वा अवसिञ्चति । सू० ९ ।—दुष्टगण्डविशिष्टभैषज्यमुच्यते । तैलमभिमन्त्र्य व्याधितं गण्डं संमार्ष्टि । सू० १० ।—स्थूणायां निकर्षति घृष्यति व्रण रुधिरकृते दुष्टव्रणे दुष्टगण्डव्याधिभैषज्यं समाप्तम् । सू० ११ ।—अक्षितव्रणभैषज्यमुच्यते । गोमूत्रमभिमन्त्र्य तेन व्रणं मर्दयति । यस्य व्रणस्य मुखं नास्ति । अक्षतदुष्टव्रणे भैषज्यम् । सू० १४ ।—तृणरजस्य फेनमभिमन्त्र्य व्रण प्रलिम्पति । यस्य गण्डदुष्टस्य रुधिरं न च वहति तस्य समाप्तमक्षतव्रणभैषज्यम् । सू० १६ ।—गण्डमालाभैषज्यमुच्यते । शंखं घृष्ट्वाभिमन्त्र्य गण्डमालां प्रलिम्पति । श्वानलालां कुर्कुटलालां प्रलिम्पति । जलौकामभिमन्त्र्य गण्डमालायां संसर्जयति । सू० १७ ।—सैन्धवलवणं चूर्णयित्वाभिमन्त्र्य गण्डमालाया उपरि प्रकिरति । ततस्तस्योपरि निष्ठीवति मुखलालां प्रक्षिपति । सू० १८ ।—अथ पक्षिणोऽभिघाते भैषज्यमुच्यते । श्वानपदस्थानमृत्तिकामभिमन्त्र्य पक्षाहतं देशं प्रलिम्पति । पक्षहतभैषज्यम् । सू० १९ ।—शुनो मक्षिकामभिमन्त्र्याग्नौ प्रक्षिप्य ततो धूपयति व्याधिप्रदेशम् । काकगृध्रकपोतश्येनादिपक्षिणाभिघाते भैषज्यं समाप्तं । सू० २० ।—अथ गण्डभैषज्यमुच्यते । ग्लौरितः प्रपतिष्यतीति अर्धर्चेन गोमूत्रमभिमन्त्र्य गण्डं मर्दयति । प्रक्षालयति । दन्तमलं प्रलिम्पति । तृणरजःफेनं ... प्रलिम्पति । समाप्तं गण्डभैषज्यं गण्डस्कोटिकां इत्यर्थः । सू० २१ ।—गर्दभाद्युरुं गण्डभैषज्यमुच्यते ... । शान्त्युदकमभिमन्त्र्य क्षतं प्रोक्षति । आज्यं जुहोति । ततो मनसा संकल्पयति सम्पातान्ददाति । समाप्तं गर्दभदशजातिपिकादिक्षतगण्डभैषज्यम् । सू० । २२ ।—पापगृहीते जलोदरे च भैषज्यमुच्यते । सू० २६ ।—विषे उपविषे स्थावरजङ्गमे च भैषज्यमुच्यते । मक्षिकायां च भैषज्यम् । सू० २७ ।—काशो श्लेष्मपतने च भैषज्यमुच्यते । भोजनमभिमन्त्र्य ददाति । सक्तुमभिमन्त्र्य भक्षयति । उपस्थानमादित्यस्य । उदकमभिमन्त्र्याचामयति । सू० २८ ।—केशवृद्धिकरणे भैषज्य-

मुच्यते । काचीमाचीफलमणिं बध्नाति । जीवन्तीफलं बध्नाति । भृङ्गराजं बध्नाति । केशवृद्धीकरणे केशजनने ह्रस्वकेशेषु वृद्धकरणभैषज्यम् । माषतिलादि कृष्णमन्नं भक्षयित्वा काचीमाचीफलं भृङ्गराजाभ्यां सहोदकमभिमन्त्र्य रात्रौ ब्राह्मे मुहूर्त्तेऽवसिञ्चति ।

कण्डिका ॥ ३२ ॥

सू० १ ।—जम्भगृहीते भैषज्यमुच्यते । स्तनमभिमन्त्र्य बालकाय प्रयच्छति पानार्थं पतिः करोति कर्ता करोति । दुःखनाशने भैषज्यम् । सू० २ ।—पाययति बालकं पिता वा माता वा पाययति तत्रोपरि दुह्यते अभ्यवदुग्धाः । सू० ३ ।—सर्वव्याधिभैषज्यमुच्यते.....सू० ५ । वृश्चिकभैषज्यमुच्यते "तिरश्चिराजेरित्यृचेन" ज्येष्ठीमधु पिष्ट्वाभिमन्त्र्य पाययति । सू० ६ ।—क्षेत्रमृत्तिकां जीवकोषणीचर्मवेष्टितां मणिं कृत्वा सम्पात्याभिमन्त्र्य बध्नाति । वृश्चिकमशकभैषज्यम् । जीवतः पशोश्चर्म जीवकोषणीत्युच्यते । सू० ७ । यानि यानि पायनान्युक्तानि तानि "तिरश्चिराजेरि"-त्यस्य सूक्तस्य भवन्ति । समासं वृश्चिकपिपीलिकामशकदंशशार्कोटजलूकाभैषज्यम् । ...सू० ८ । अथ गण्डमालाभैषज्यमुच्यते । "अपचितां लोहितीनामिति द्वाभ्याम् । "आसुस्रुस" इत्येका एताभिस्तिसृभिर्वंशधनुषं कृष्णोर्णमयीं ज्यां कृत्वा चित्रितेन शरेण गण्डमालां विध्यति प्रत्यृचम् । त्रयः शरा भवन्ति । सू० ९ ।—"या ग्रैव्या अपचित" इति चतुर्थ्या ऋचा चतुर्थेन शरेण गण्डमालामभिनिधाय विध्यति । सू० १० ।-कृष्णोर्णज्यावज्वालितोदकमभिमन्त्र्य उपाकाले...अवसिञ्चति व्याधितम् । सू० ११ ।—अथ राजयक्ष्मभैषज्यमुच्यते ।.....तृचेन वीणातन्त्रीखण्डं सम्पात्याभिमन्त्र्य बध्नाति । सू० १२ ।—वाद्यवीणा तस्याङ्गस्वरं विष्णोर्वाद्यवीणाकण्ठं शिखण्डं वीणातन्त्रीं बद्ध्वा सम्पात्याभिमन्त्र्य बध्नाति । सू० १३ । स्वयंपतितवीरिणखण्डत्रयमेकत्र बद्ध्वा सम्पात्याभिमन्त्र्य बध्नाति । सू० १४ ।—जलोदरे वरुणगृहीते भैषज्यमुच्यते । सू० १७ ।—अथ ज्वरभैषज्यमुच्यते । "नमो रूण्येति" सूक्तद्वयेन खट्वायां व्याधितं कृत्वा बध्वा तत अधः खट्वायां व्याधितमुपवेश्य तत उदकमभिमन्त्र्य व्याधितमवसिञ्चति । व्याधितं सिच्यमानं यथा मण्डूकमभिषिच्यते तथा कुर्यात् । सू० १८ ।—अथ सर्वभैषज्यमुच्यते । अर्थसूक्तेन व्याधितेन..... अभिमृशति । सू० २० ।—सर्वविषभैषज्यमुच्यते । सू० २१ ।-"इन्द्रस्य प्रथम०" इत्यर्थसूक्तेन पैद्गं कीटकं तालिणीति लोकप्रसिद्धा तं पिष्ट्वाभिमन्त्र्य नस्तं ददाति... दक्षिणनासिकापुटे । सू० २२ ।—अथ सर्पभये भैषज्यमुच्यते । पैद्गं श्वेतवस्त्रवेष्टितमभिमन्त्र्य यत्र सर्पभयं तत्र निखनति । पैद्गं हिरण्यवर्णसदृशः कीटश्चित्रितो वासः पैद्ग इत्युच्यते । सू० २४ ।—"आरे अभूदित्यृचान्तेन उल्मुकं प्रताप्याभिमन्त्र्य ततो

विष्वणं दृष्ट्वा तत्संमुखं क्षिपति । सू० २५ ।—सर्पादर्शने यतो दष्टस्ततः प्रक्षिपति उल्मुकम् । सू० २६-२७ ।—अथानुक्तेषु कौशिकोयेषु सर्वव्याधिभैषज्येषु उक्तेषु चानुक्तेषु वा पठितेषु तत्र सर्वभैषज्यमुच्यते । सर्वव्याधिभैषज्येषु मन्त्रओषधिवनस्पतीनामनुक्ताभ्यप्रतिसिद्धानि भैषज्यानां अंहोलिङ्गाभिरुच्यते अंहोलिङ्गेन गणेन तानि कर्त्तव्यानि । "आशानामाशापालेभ्य" इत्येका अंहोलिङ्गगणः । यानि च वै प्रतीकान्युच्यन्ते तान्यभिमन्त्रणेन सर्वव्याधिभैषज्यानि भवन्ति तान्युच्यन्ते । "अक्षिभ्यां ते मुञ्चामि त्वा०", उत देवाः०", "आवतस्तशीर्षक्ति, अंहोलिङ्गगणः । एतैः पञ्चप्रतीकैः...अन्यतमेनैकेनाभिमन्त्रणं कुर्यादित्यर्थः । अंहोलिङ्गगणः ।" सर्वव्याधिषुभैषज्यानि । अथवा तैः सूक्तैः कर्तव्यानि । अथवा अंहोलिङ्गेन कर्तव्यानि । उक्तव्याधीनां परिगणनं क्रियते । सू० २८ । अथ स्त्रीकर्मणो विधिं वक्ष्यामः । पुत्रकामायै स्त्रीकामायै स्त्रियै मृतापत्यायै रजोनाशे च शान्तिरुच्यते ।

कण्डिका ॥ ३३ ॥

सू० १ ।—अथ प्रसवकाले इदं कर्म क्रियते यथा सुखेनैव प्रसवो भवतीत्यर्थः । अथ प्रसूतिकरणमुच्यते सू० ३ ।—छिद्यमानासु मुञ्जेषीकासु गर्भसंस्थमरणं भवेत् । एकं कर्म ॥ सू० ५ ॥ शालाग्रन्थीन् विचृतति । द्वितीयं कर्म सू० ६ ।-कटिप्रदेशे बध्नाति तृतीयं कर्म । केचित् "वषट् ते पूषन्निति सूक्तेन तैलमभिमंत्र्य प्रसवकाले अभ्यञ्जनं कुर्वन्ति । सू० ८ ।—"अन्या वो अन्यमवेति" ओषध्यस्ता एवं एकत्र बध्नाति । सू० ९ ।—सर्वत्रौषधिखननमेतेन विधानेन कर्तव्यं । यत्र क्वचिदौषधिखननं तत्र सर्वत्रानेन विधानेन कर्तव्यं । सू० १८।—यदि तान्येकत्र भवन्ति तदा पुत्रो जायते। विज्ञानकर्मेदं । सू० २० ।—यदि पुंनामधेयं स्पृशन्ति तदा कुमारो जायते ।

कण्डिका ॥ ३४ ॥

सू० १ ।—अथ वन्ध्याप्रजननकरणमुच्यते । सू० २ । —ततो गृहे पुरोडाशं प्रमन्दं कटुपा अलंकारान्समपात्य प्रयच्छति । सू० ३ ।—अथ मृतापत्यायाः स्त्रियस्तस्याः शान्तिरुच्यते । गर्भस्रावे जातमात्रे मृते वा स्त्रियां वा पुरुषे वा बाले वा यूनि वा मृते इदं कर्म । त्रीणि मण्डपानि प्राग्काराणि कृत्वा एकस्मिन् मण्डपे अभ्यातानान्तं कृत्वा ।... सू० ४ ।—पालाशपत्रे ॥ ५ ॥ सोसेषूपरि स्त्रीमधिष्ठाप्य तेनोदपात्रेणाप्लावयति । सू० १० । —प्राक्पश्चिमद्वारेषीकं द्वार्योरुपरि बद्ध्वा ततो "निःसालामि"ति-सूक्तेनौदुम्बरीः समिधः मृतापत्यायै आदधाति । सू० १२ । —पतिलाभकर्माण्युच्यन्ते । सू० १३ ।—आशयति कुमारी । सू० १४ ।—मृगारवरमृत्तिकाया वेदिं कृत्वा हिरण्यालङ्कारान् गुग्गुलं मौक्षं च यथोक्तान् सम्पात्य बन्धनं धूपनं प्रलेपनं कुर्यात् । पूर्वस्य संहितविधिश्लोकः ।

आवपेत्सुरभिगन्धान् क्षीरे सर्पिस्तथोदके ।
एतदायनमित्याहु रौक्षं तु मधुना सह ॥—

सू० १५ ।—दक्षिणामुखी कुमारी प्रक्रामति । सू० १६ ।—नावं सम्पात्य "भगस्य नाव" मित्यृचा उत्तारयति॰ सू० १७ ।—सप्तदानतंत्र्या वत्सान् बन्धयित्वा सम्पात्याभिमंत्र्य कुमारीं मोचयति । स्वयं न कर्त्ता । यदि प्रदक्षिणं मोचयति तदा पतिलाभः । सू० १८ ।—वृषभं विसर्जयति । सू० २१ ।—आगम कृशरं आशयति आज्यतंत्रे भगिनीकं । सू० २३ ।—तत "अर्यम्ण" इत्यर्धर्चेन गृहाभ्यन्तरे कोणे, बलिहरणं करोति । सू० २४ ।—यत आगच्छति काकस्तत आगच्छति वरः समाप्तानि पतिलाभकर्माणि ।

कण्डिका ॥ ३५ ॥

सू० १ ।—पुंसवानान्युच्यन्ते । सू० २ । — नक्षत्रकल्पे उक्तानि पुंनक्षत्राणि सू० ३ । —बाणं विवृहति । शरमणिं सम्पात्यामिमंत्र्य बध्नाति । सू० ४ ।—अध्यण्डे बृहतिपालाशविदार्यौ वा एकत्र पिष्ट्वाभिमंत्र्य दक्षिणेनाङ्गुष्ठेन दक्षिणस्यां नासिकायां नस्तं ददाति । पुत्रार्थं कर्म पुंसवनमित्युच्यते । सू० ५।६।७ ।—केलुतांश्च पलाशत्सरु निर्वर्तं निघृष्य शिश्ने आधाय ततो मैथुनं करोति । समाप्तं गर्भाधानं । सू० ८।९ । —पुनः पुंसवनमुच्यते मधुमन्थेऽग्निं निक्षिप्याभिमंत्र्य पाययति स्त्रीं । सू० १०।—शमीगर्भाश्वत्थस्याग्निं कृष्णोर्णया वेष्टयित्वा सम्पात्याभिमन्त्र्य बध्नाति आज्यतन्त्रे । समाप्तं पुनः पुंसवनं । सू० ११ ।—अथ गर्भाधानमुच्यते हस्तावर्तकं कर्णादिकं सम्पात्याभिमन्त्र्य बध्नाति आज्यतन्त्रे । समाप्तं गर्भाधान । सू० १२ ।—अथ गर्भदंहणमुच्यते । "अच्युता द्यौरि"ति । सू०१६ । "धाता दधात्वि"ति चतसृभिर्गर्भिण्या उदरमभिमंत्रयते वीरकर्म समाप्तं सू० १७ । अथ प्रजननकर्म । "प्रजापतिर्जनयती"ति सूक्तेन । सू० १९ ।—उदकुलिजं संम्पातवन्तं कृत्वा गर्भिणीं परिहृत्य मध्ये निनयति । सुरा कुलिजं ... भक्तं सुरां प्रपां सम्पात्याभिमन्त्र्य प्रजाकामायै प्रयच्छति । समाप्तं प्रजागर्भकर्म वन्ध्यायाः । सू० २० । —अथ सीमन्तकर्म उच्यते । श्वेतपीतसर्षपान् सम्पात्याभिमन्त्र्य पुण्याहान्ते बध्नाति । सू० २१ ।—अथ स्त्रीवशीकरणमुच्यते । वृक्षत्वक्, तगरं, शरखण्डं, अञ्जनं, कुष्ठं, ज्येष्ठीमधु, वातसंभ्रमतृणानि । एतानि द्रव्याणि आज्येनालोड्य अङ्गं समालभेत् रुच्यर्थम् । सू० २२ । —अङ्गुल्या तुदति भार्यायामुदरे पृष्ठौ रुच्यर्थी । सू० २३ । —एकविंशतिबदरीकण्टकानादधाति । सू० २४ ।—एकविंशतिबदरीप्रान्तानि सूत्रेण वेष्टयित्वा । सू० २६ । —खट्वां अधोमुखपट्टिकां गृहीत्वा...स्वपिति । त्रिरात्रं कर्म । सू० २७ ।—अर्दयच्छेते । सू० २८ ।—समाप्तानि संवननानि वशीकरणानि कामविषये स्त्रियामुत्साहो भवति ।

कण्डिका ॥ ३६ ॥

सू० १–२ ।—स्वापनविघ्नशमनम् । स्त्रीस्वापनकर्म उच्यते । अभ्यन्तरद्वारे शेषमुदकं न्युब्जति । सू० ४ ।—स्त्रियाः खट्वाया दक्षिणपादमभिमन्त्रयते । खट्वाया रज्जुमभिमन्त्रयते । स्त्रीस्वापनं पुरुषस्य विषये काम उत्पद्यते । कामविषये स्त्रीस्वापनं समाप्तम् । लज्जाप्रच्छादनं लज्जा भवतीत्यर्थः । स्वापनं सर्वेषां मानुषाणां निद्राकामानाम् । मैथुनमाचरतो विघ्नं न भवति । सू० ५-६ ।—अथ पलाशिन्याः स्त्रियाः बन्धनकर्म तन्त्रक्रमेण क्रियते । रज्जु कल्पते तद्रज्जुवेष्टनमुच्यते । "अस्थाद् द्यौरस्थादि"ति द्वितीयेन सूक्तेन रज्जुवेष्टनमभिमन्त्र्य वंशाग्रे बध्वा मध्यमस्थूणे बध्नाति । सू० ७ । —शयनपादमभिमन्त्र्य उत्पले बध्नाति । सू० ९ ।—अङ्कुशेन तिलाञ्जुहोति । सू० १० । —जायापत्योरक्रोधकरणमुच्यते । सू० १२ । —सौभाग्यकरणमुच्यते । शङ्खपुष्पीमूलमोषधिवत् खात्वा ... बध्नाति । सौवर्चलपुष्पमभिमन्त्र्य यस्य सौभाग्यमिच्छति तस्य पुष्पमभिमंत्र्य तस्य शिरसि बद्ध्वा । सौवर्चलं सूर्यवेलेति प्रसिद्धा । सू० १३-१४ ।—दुष्टस्त्रीवशीकरणमुच्यते "रथजितामि"ति सूक्तैस्त्रिभिर्मांषानभिमन्त्र्य स्त्रियाः क्रमेषु वपति ।··· चणकान्··· वपति । खट्वास्थाने वा गृहे शयनदेशे वा । शरभृष्टीरादीक्षा अभिमन्त्र्य प्रतिदिशमभ्यस्यति । एषु पतिप्रतिकृतिं कृत्वा··· हृदये विध्यति । दार्भ्यूषेण भाङ्गज्येन । समाप्तानि पतिद्वेषिणीकर्माणि । पुरुषो वा स्त्रीणां द्वेषं करोति । अनेन कर्मणा शान्तिर्भवति । सू० १५ ।—अथ स्त्रियो वा पुरुषस्य वा दौर्भाग्यकरणमुच्यते । दहनघातिता गौः अनुस्तरणीत्युच्यते । ईशानहता ज्वरहतेत्युच्यते । तत उलूखलदरणे त्रिशिले निखनति तत उलूखले ददाति । उपरि यस्य दौर्भाग्यं क्रियते तस्य एतानि गृह्णीयात् । सू० १६ ।—स्त्रीपुष्पमालां पिष्ट्वा अन्वाह । सू० १७—कृष्णसूत्रेण वेष्टयित्वाभिमन्त्र्य··· व्यत्यासं अश्मानं शालाया उपरि ददाति । व्यत्यासेन निखनति दौर्भाग्यकामः । सू० १८ ।—अथ तस्याः सौभाग्यकरणमुच्यते । "यं ते भगं निचख्नु"रिति–शिला उत्खनति उत्पादयति । "भगमस्या" इत्यनेन सूक्तेन यत्कृतं तदनया विनश्यति । समाप्तं यस्या दौर्भाग्यं कृतं तस्याः सौभाग्यकरणम् । सू० १९ ।—अथ सपत्नीजयकर्माण्युच्यन्ते । सपत्नीविद्वेषणं··· बाणपर्णी मासिका लोकेप्रसिद्धा । सू० २२ ।—अथ स्त्रीविषये काम उत्पन्ने कामविनाशकान्युच्यन्ते । यस्मिन्देशे काम उत्पन्नस्तत्स्थानं यावत् स्त्री वा पुरुषो वा··· व्रजति । सू० २५ ।—स्त्रीविषये ईर्ष्याविनाशकान्युच्यन्ते । ईर्ष्यालुं दृष्ट्वा जपति । सक्तुमन्थमभिमन्त्र्य ईर्ष्यालुकाय ददाति··· भक्षार्थम् ॥ २६ ॥ ईर्ष्यालुकस्य कटिप्रदेशे खल्वाभिमन्त्र्य धमति ॥ २८ ॥ अथ मन्युविनाशकान्युच्यन्ते स्त्रीविषये पुरुषस्य । मन्युमन्तं

पुरुषं दृष्ट्वाश्मानमभिमन्त्र्य हस्तेन गृह्णाति ॥ सू० २९ ॥ अश्मानं भूमौ निदधाति। सू० ३१ ।—मन्युमतः पुरुषस्य छायायां धनुरभिमन्त्र्य सज्जं करोति। सू० ३२—अथ सर्वविषये मन्युविनाशकान्युच्यन्ते। दर्भमूलमोषधिवत् खात्वा सम्पात्याभिमन्त्र्य बध्नाति मन्युके ! सू० ३३ ।—अवीरजननमुच्यते अपुत्रजननमित्यर्थः। अग्रे जातानित्यृचा अश्वतरीमूत्रेण पापाणं निघृष्य ततोऽभिमन्त्र्य भक्तेन सह ददाति।...अलंकारं समालभते। विद्वेषणं परस्य । अथ वन्ध्याकरणमुच्यते। "प्रान्या"निति तृचेन अश्वतरीमूत्रेण । सू० ३४ ।—समाप्तानि विद्वेषणानि परस्त्रीवन्ध्याकरणानि। सू० ३५ ।—जारोच्चाटनमुच्यते... ॥ ३७ ॥ पाषाणमभिमन्त्र्य जारमैथुनस्थाने प्रक्षिपति उच्चाटनार्थम्। सू० ३८ ।—पुरुषस्य स्त्रिया सह परस्परं विद्वेषणकरणान्युच्यन्ते। बाणापर्णी लोहिताजाया द्रप्सेन संनीयाभिमंत्र्य शयनमुपरि किरति। स्त्रीपुरुषस्य उभयरुचिविनाशकरणम्। सू० ३९ ।—अथ दौर्भाग्यकरणमुच्यते।...हृदयं मुखं वाभिमन्त्रयते परस्त्रियै। समाप्तानि स्त्रीकर्मकरणानि। तत्र भद्रश्लोकः।

भैषज्यकर्माणि प्रोक्तानि सर्वव्याध्युपशान्तये।
स्त्रीकर्माणि ततः पश्चाच्चतुर्थैः संहिताविधौ ॥ इति चतुर्थोऽध्यायः ॥ ४ ॥

कण्डिका ॥ ३७ ॥

अथ विज्ञानकर्मणां विधिं वक्ष्यामः। लाभालाभजयपराजयसुखदुःखोत्कर्षापकर्षसुभिक्षदुर्भिक्षक्षेमाक्षेमभयाभयरोगारोगाः। त्रसोऽस्तीति नवेति-धनाधनधर्माधर्म-मरणामरणं। धान्यं भविष्यति न वेति। क्षेत्रं भविष्यति न वेति। गृहे वासो भविष्यति न वेति धान्यपुत्रपशुहिरण्यस्रग्वस्त्राणि च। विद्याशास्त्रादिलाभो भविष्यति न वेति। जीवितमरणे गमनागमने बलाबले । सदसद्योगाद् व्याधितस्य जीवितमरणाभ्यां प्रसवे पुत्रयोगात् पुत्रे जाते धर्माधर्मसंयोगात् मित्रामित्रसंयोगात्। ग्रामोऽस्ति वा न वेति। पुरुषस्य विवाहोऽस्ति वा न वेति। संवत्सरे मासे वा भविष्यति सुभगा वा दुर्भगावा। गृहं ग्रामादि, भविष्यति न वा। आधानं भवेन्नवेति। इत्यादि मनसा वाचा वा संचिन्त्य तत्कर्म कुर्यात्। सू० १ ।—राध्यमानं क्षीरौदनमभिमन्त्र्य तत आसिञ्चेत्। मनसा चिन्तयेत्। वाचा चिन्तयेत्। ओदनं श्रृतं भवेदश्रृतं वा भवेत्। यदि यथा चिन्तितं भवति तदा तस्य कर्मसिद्धिर्भविष्यतीति जानीयात्। इध्ममुपसमाधायाभिमन्त्र्य आयाचेत्। उत्कुचनेनार्थः। दर्भस्तम्बमभिमन्त्र्य आयाचेत्। यत्र समं विषमं नानार्थसिद्धिः। पूर्वेद्युः पाठाभिमंत्र्य आयाचेत्। पत्राणां पत्राणां संकोचनेनार्थसिद्धिः। सू० २ ।—अम्बयो यन्तीति सूक्तेन संग्रामे

पूर्वेद्युर्वेदिं कृत्वा अभिमंत्र्य द्वितीयेऽहनि समविषमेण भावेन सिद्धिः ।•सू० ३ ।—पञ्चग्रन्थिवेणुदण्डमभिमंत्र्य आयाच्यं समे धारयति। अभीष्टदिशि पतनेनार्थसिद्धिः। इषुं सन्धायाभिमन्त्र्यायाचेत् । चिन्तितं प्रक्षेपणेनार्थं। कुम्भे उदकपूर्णं दुग्धं प्रक्षिप्यायाचेत्। जनाधिकेनार्थसिद्धिः यथा चिन्तितं तथा सिद्धिः कमण्डलुमुदकपूर्णं दुग्धमाक्षिप्याभिमंत्र्यायाचेत्। जनाधिकेनार्थसिद्धिः। दर्भस्तम्बमभिमन्त्र्यायाचेत्। काम्पीलशाखां मूर्ध्नि धारयित्वाभिमन्त्र्यायाचेत्। इष्टदिक्पतनेनार्थः। युगमभिमंत्र्यायाचेत्।.....धान्यमभिमंत्र्यायाचेदग्नौ प्रक्षिपेत् प्रदक्षिणज्वलनेनार्थः। हस्तयोरञ्जलिद्वयमभिमन्त्र्यायाचेत्। अज्ञातस्य "वेनस्तदि"ति सूक्तेन एकविंशत्या शर्करया अभिमन्त्र्यायाचेत् धनेनार्थः समविषमभावेन यथावतार्थः। सू० ४।—अथ नष्टद्रव्यपरीक्षणे क्रियमाणे इदं कर्म। "वेनस्तदि"ति सूक्तेन। सू० ६। वेनस्तदिति सूक्तेनाहतेन वस्त्रेण वेष्टितं हलं सम्पात्याभिमन्त्र्य येन हरेतां ततो नष्टः। अक्षाः कुम्भवत्कृत्वा सम्पात्य येन हरेतां ततो नष्टः। समाप्तं नष्टद्रव्यपरीक्षणे विज्ञानम्। सू० ७।—अथ कुमारीविज्ञानमुच्यते। वेनस्तदिति सूक्तेन। सू० ११।—"वेनस्त"दिति सूक्तेन कुमारीमुदकाञ्जलिं पूरयित्वाभिमन्त्र्य। सू० १२। समाप्तं कुमारीविवाहकाले विज्ञानम्।

कण्डिका ॥ ३८ ॥

अथ नैमित्तिकान्युच्यन्ते। सू० १।—दुर्दिनविनाशकर्मणां विधिं वक्ष्यामः। दुर्दिनमभिमुखमुपतिष्ठते सर्वत्र दुर्दिनविनाशकानि। सू० २।—प्रत्यृचमुदकं प्रक्षिपति। सू० ३।—खड्गं गृहीत्वोपतिष्ठते अभिमुखः। उल्मुकं गृहीत्वोपतिष्ठते सूर्यस्याभिमुखः। लकुटं गृहीत्वोपतिष्ठते। सू० ४।—उन्मृजानो अर्कमुखो भूत्वोपतिष्ठते। सू० ६।—पटेरकसमिध अर्कसमिध आदधाति स्थण्डिले। सू० ७।—खदां खात्वा खदां त्रिःपरिक्रम्यार्कनिर्लुञ्छितं कृत्वा खदायां प्रक्षिपति सूक्तान्ते। ततः पांसुना खदां पूरयति। वृष्टिनिवारणं समाप्तं। सू० ८।—अशनिनिवारणं कर्म व्याख्यास्यामः। अशन्यभिमुखमुपतिष्ठते। सू० ९।-एतत्कर्मक्षेत्रे। अशनिनिवारणं।

अतिवृष्टिरनावृष्टिः शलभा मूषकाः शुकाः।
स्वचक्रं परचक्रं वा सप्तैता ईतयः स्मृताः॥

सू० ११।—अवदीर्यमाणे ग्रामे वावसाने वाग्निशरणे वा सभायां वा गृहे वा प्राकारे वा रक्षार्थं कर्म वक्ष्यामः। सू० १२।—पत्तने रक्षार्थान्युच्यन्ते। सू० १३-१६।—दृंहणानि। दृतिकर्माणि दृढीकर्माणि वा। समाप्तानि दृढकर्माणि।... गृहपत्तने ग्रामपत्तने कार्यदृढकरणे अवहरणरक्षार्थं। सू० १७।—विवादे जयकर्मणां विधिं व्याख्यास्यामः। ज्येष्ठीमधुमभिमन्त्र्य भक्षयति। ततः सभां प्रविशति अपराजित-

देशात्। पक्षिजयकर्म सभाजयकर्म समाप्तं। सू०१८।—विवादे जयकर्माण्युच्यन्ते। पाठामूलं मुखे प्रक्षिप्य तदनन्तरमपराजितादेशादागच्छति। सू १९।—पाठामूलं मुखे प्रक्षिप्यान्वाह। सू० २०।—पाठामूलं बध्नाति। सू० २१। पाठापुष्पमालामभिमंत्र्य शिरसि धारयति। पाठापलाशी सप्तपालाशी सप्तपर्णी मालामभिमन्त्र्य धारयति। सू० २२।—वृष्टिनिवारणं भक्षभोजने कर्म उच्यते। भक्तमभिमन्त्र्य भक्तं शाकादि। ततो भुञ्जीत। वृष्टिनिवारणं समाप्तं। सू० २३।—ब्रह्मजज्ञानमिति सूक्तेन प्रथमेन काण्डादिना सूक्तेन वेदं वा अनुवाकं वा सूक्तं वा कल्पं वा ब्राह्मणं वा अध्ययनं कर्तुमिच्छति तदा तदा सूक्तं जपित्वा ततोऽध्ययनं कुर्यात्। कलहशमनं समाप्तं। सू० २४।—ब्रह्मजज्ञानमिति सूक्तं जपति विवादे जयार्थं। सू० २५।—ब्रह्मजज्ञानमिति सूक्तं जपित्वा मीमांसाव्याकरणादिशास्त्रे वादं करोति तदा जपित्वा करोति प्रतिवादिनं जयति। सू० २६।—विवादकर्म उच्यते। चाक्रिकस्य रज्जुमभिमंत्र्य धारयति हस्तेन विवादकर्मकर्तुं वदने कलहो न भवति। सू० २७।—सभाजयकर्माण्युच्यन्ते सभास्तम्भनकर्म जयकर्म तदा सभासद धर्माधिकरणादि जायते। क्षीरौदनं भक्षयति। सू० २९।—"यद्दाती"ति ऋचं जपित्वा सभां वदेत्। निरीक्षते। अन्वाह। यद्वदति तत्र तत्र तथैव वदति यच्चक्षुषा पश्यति तद्दक्षन् विघातो न भवति।

कण्डिका ॥ ३९ ॥

सू० १।—तिलकमणिं सम्पात्याभिमंत्र्य पुण्याहान्ते बध्नाति। आत्मरक्षार्थं मणिः। सर्वत्र प्रत्यभिचरणार्थोमणिं बध्नाति। सू० ५–१२। ततः शान्त्युदकं करोति महाशान्तिधानं मातलीवर्जं कृत्वा "दूष्या दूषिरसी"ति कृत्वा प्रतिहरणोगणः। ततो वास्तोष्पत्यमातृनाम चातनशान्तिगणे एते पञ्चगणाः। शान्त्युदकेन आवाप्यन्ते। ततो मातलीं कृत्वा शाम्युदकभाजनेचिन्त्याद्या आदधाति। मंत्रोक्तायां दर्भापामार्गसहदेवी आठरूषककाम्पीलश्चिते वारसदं पुष्पा एता मंत्रोक्ता भाजने एता ओषधयः शान्त्युदकेऽवधाय ततः शान्त्युदकं करोति। तेन शान्त्युदकेन प्रोक्षन् व्रजति। अथ रात्रौ इदं कर्म प्रमाणकं करोति॥ उपानहौ परिधाय उष्णीषं कृत्वा अग्रे भूत्वा कर्त्ता शान्त्युदकेन प्रोक्षति। कृत्यास्थानं यावत्। बालागमपात्रेषु कृत्यादिषुच सर्वेष्विदं कर्म भवति। "अमित्रचक्षुषा" इत्यनेन मंत्रेण कृत्यां निरीक्षते। स च निरीक्षते। "कृतव्यधनि इत्यृचा कृत्यास्थानं अवेक्षते। "कृतव्यधनि"–इत्यृचा कर्त्ता काण्डेन विध्यति आङ्गिरसकल्पविधानधनुषा। अथवा दार्भ्युषेण काण्डेन विध्यति। सू० १५।—मांसानि शकले निधाय कर्त्ता संदंशं गृहीत्वा चर्मणि बद्धा प्रैषकृत् परिक्रम्य बन्धान्मुञ्चति। सू० १८।—नवनीतेनाभ्यज्याक्षिणी वा अङ्के। सू०२०।—

अरण्ये गच्छन्ति । सू० २७ ।—वास्तोष्पत्यादयश्चत्वारोगणा उच्चैः पठन्ति । सू० २८ ।—कर्त्ता अभिचारकृत्पुरुषस्य शान्त्युदकेन मर्माणि संप्रोक्षते । गार्हपत्य-सभाआमपात्रकूपकुक्कुट इत्यादीनि मर्माणि संप्रोक्षति । सू० २९ ।—कृत्यास्थानं कृष्णवृषभहलेन कर्षति ।

कण्डिका ॥ ४० ॥

सू० १ ।—अथ नदीप्रवाहविधिं वक्ष्यामः । नदीप्रवाहं खात्वा प्रसिञ्चन् व्रजति । सू० २ ।—काशमभिमन्त्र्य तत्र खाते रोपयति । दिवि शेवालपर्णिमभिमन्त्र्य रोपयति नदीप्रवाहे । वेधूकपाटरकं (पटेरकं) अभिमन्त्र्य नदीमार्गे निखनति । वेतसशाखामभिमन्त्र्य नदीप्रवाहने निखनति । सू० ६ ।—उदकं मण्डूकस्योपरि निनयति । सू० ७ ।-पूर्वंप्रवाहो न भवति । अथ नवधा प्रवाहे इदं कर्म कुर्यात् । वरुणदेवतापाकयज्ञविधानेन आज्यभागान्तं कृत्वा "यददः सम्प्रयती"रिति सूक्तेन त्रिर्विभज्य जुहोति । तत उत्तरतन्त्रम् । कृष्णव्रीहिं कृष्णायाः गोः पयः घृतं च वेतसकाष्टासु च इन्धनं । वेतसपत्रैः स्तरणं पटेरकेण वा अस्मिन् तन्त्रे सर्वं मारुतं कर्त्तव्यम् । उदकप्रवाहे उदकप्रवाहभये नदीभङ्गे ग्रामे नगरे वा । यत्र उदकनदी-भयं भवति तत्र सर्वत्र वारुणो होमः कर्तव्यः । सू० ९ ।—बलिं हरेत् ततः "अति-धन्वानी"ति द्वाभ्यां न भवति । मन्त्रोदकं नदीप्रवाहे प्रसिञ्चन् व्रजति । समाप्तं नदी दूरगमनकर्म । सू० १० ।—यदि न वहति नदी तदा वक्ष्यमाण इदं कर्म । यददः संप्रयतीरिति नदीं हन्ति । वेतसशाखामभिमन्त्र्य नदीमवसिञ्चति । यदि दूरं गता पुनः निवर्तते तदा इदं कर्म एके आचार्याः । "यददः सम्प्रयती"त्यादि सर्वमेकं कर्म मन्यन्ते । अन्ये भिन्नानि कर्माणि मन्यन्ते । अन्ये प्रसिञ्चन् कर्म हिर-ण्यमण्डूककर्म योगकर्म मन्थनकर्म पाणिकर्म एतेषां विकल्पं मन्यन्ते । समुच्चयो वा इति दारिलमतं समुच्चयः । समाप्तं अन्यप्रवाहे नदीकर्म ॥ सू० ११।१२ ॥ अथ अरणिसमारोपणकर्म । अरणीद्वयं प्रतापयति पाणी वाप्रता पयति । उत्थाय वा गृह्णाति । ततोऽनेन विधानेन पथि गच्छता दोषो न भवति । सू० १३ ॥ अथावरोहणमुच्यते ॥ सू० १४।१५ । पुरुषस्य वीर्यंकरणे विधिं वक्ष्यामः । कपिकच्छुमूलमोषधिवत् खात्वा···सुरवालकमोषधिवत् खात्वा दुग्धे श्रपयित्वा उप-विष्टं धनुरुत्सङ्गे कृत्वा । दुग्धमभिमंत्र्य पाययति । सू० १६ । मयूखे मुसले वासीनो यांत्वे"त्यृचा सुरवालकं दुग्धे क्वाथयति पीत्वा कीलके उपविश्य पिबति । कपिक-च्छुं मुसले उपविश्य पिबति । सूकरवालकं मुसले उपविश्य पिबति न शिश्नस्य स्थूलकरणमुच्यते । "यथासित"—इति सूक्तेन एकशाखार्कमणिं सम्पात्याभिमन्त्र्य अर्कसूत्रेण बध्नाति । सू० १७।१८ । "यावदङ्गीन" मित्यृचा कृष्णमृगचर्ममणिं

बध्नाति ॥ "आ वृषायस्वे"ति सूक्तेन हरिणस्कन्धचर्ममणिं कृत्वा कृष्णबालेन बध्नाति ॥ वीर्यकरणं उत्थापनं स्थूलकरणं च भवति रेतोनाशे च ॥

कण्डिका ॥ ४१ ॥

सू० १ । अथ वृष्टिकर्मविधिं वक्ष्यामः ॥ सू० २।३ । त्रयोदशेऽहनि पाकयाज्ञिकं तन्त्रं व्रतोपायनान्तं कृत्वा ततो "देवस्यत्वा सवितु"रित्यादि मरुद्भ्यो जुष्टं निर्वपामि। "मरुद्भ्यस्त्वा जुष्टं प्रोक्षामी"ति अनेन यजुषा तावत् समानं यावदाज्यभागौ ततः क्षीरौदनं जुहोति ॥ "समुत्पतन्निवति"सूक्तेन पञ्चभिर्ऋग्भिरेकामाहुतिं ततः पञ्चभिर्ऋग्भिर्द्वितीयां षड्भिर्ऋग्भिस्तृतीयामाहुतिं जुहोति । ततः पार्वणाद्युत्तरतन्त्रं। पाकयाज्ञिकं तन्त्रमाज्यभागान्तं कृत्वा ततः "प्रभस्वेति" क्षीरौदनं एकामाहुतिं जुहोति । "न ह्नंस्ततापे"त्यृचा द्वितीयामाहुतिं । युक्ताभ्यां तृतीयामाहुतिं । पार्वणाद्युत्तरतंत्रं बर्हिर्होमे "मरुतो गच्छत हविः स्वाहे"ति । सर्वेषु वृष्टिकर्मसु कृष्णाया गोराज्यं कृष्णायाः गोः पयः कृष्णाव्रीहिशालयः वेतसः स्रुवः वैतसी समिदिन्धनं च । सू० । ३ । ४ ।—काशदिविधुवकवेतसामेकत्र कृत्वा'''तत उदकमध्ये पात्रं अधोमुखं निनयति । उदके विप्लावयति । सू० ६ । कुक्कुरशिरमभिमंत्र्य उदके विप्लावयति । मेषशिरमभिमंत्र्य उदके प्रक्षिपति मानुषकेशजरद् उपानहौ वंशाग्रे प्रबध्य योधयेति जपन् । सू० ८ । अर्थोत्थापने विघ्नशमनविधिं वक्ष्यामः ॥ अर्थकामोद्यमं यदा करोति तदा इदं करोति ।'''द्रव्य हस्त्यश्वरत्न हिरण्यधनधान्यादि एवं कामो यदोद्यमं वणिजादि करोति तदा इदं कर्म करोति ॥ यस्मिन्नारम्भा गृहादि न सिध्यन्ति तदा इदं कर्म ॥ सू० १० ।—अथ द्यूतजयकर्म उच्यते ॥ सू० ११ । उत्तराषाढ नक्षत्रे संमिनोति पूरयति । सू० १३ । त्रयोदश्यादयस्तिस्रो दधिमधुनि वासयित्वा'''अक्षान् वा कपर्दकान् वा द्यूतक्रीडां कुर्यात् । सू० १४ ।—अथार्थोत्थापनोद्यमकरविघ्नशमनकर्म उच्यते मरुतो यजते पाकयज्ञविधानेन यथा वरुणं मारुतं क्षीरौदनं,मारुतश्रितमित्यादि भवति ॥ एवमाद्या ओषधीः संपात्य अभिन्युप्जनं । विप्लावयति । श्वशिर एडकशिरः केशजरदुपानहौ युद्धउदपात्रकर्म एतानि अभिवर्षणानि कर्माणि भवन्ति एकैकस्यसूक्तस्य । एके आचार्यामारुतस्थाने मन्त्रोक्त देवतायागं कुर्यात् यथा वरुणं । अथोपधि होमसमानं वर्षकर्मणां । उदकघटं सम्पात्याभिमंत्र्य तत आप्लावयति । अवसिञ्चति । विघ्नशमनकामः । समाप्तानि अभिवर्षणावसेचनानि कर्माणि । सू० १५ ।—वैश्वानरो रश्मि"रिति सूक्तेन "उदेहि वाजिन्निति विंशत्या ऋग्भिश्च उद्यन्तमादित्यं स्नानं कृत्वोपतिष्ठते अर्थमुत्थापनकामः । सू० १७ ।—वस्त्रं ददाति । विद्रावणादिविषये शमनकामः । समाप्तानि विघ्नशमनकर्माणि । सू० १८ ।—अथ गोवत्सद्वेषो विरोधसांमनस्यमुच्यते ।

सू० १९।—ततो वत्सं त्रिः परिभ्रामयित्वा पानाय मुञ्चति । सू० २० ।—गावो वत्सेन सह विरोधि वत्सगोविरोधिसांमनस्यकर्म समाप्तं । गोवत्सस्य विरोधि सौमनस्यं । अकरणे गोः पूर्वा विनश्यति । अथ गोवत्सः । तदा राजा प्रजाः । सू० २१ ।—अश्वशान्तिविधिं वक्ष्यामः । अश्वाः शान्तास्तेजस्विनो निरुपद्रवा वेगवन्त आरोग्या भवन्ति ।

कण्डिका ॥ ४२ ॥

सू० १ ।—अथ प्रवासनद्रव्योत्थापनमुच्यते । प्रवासे गत्वा चौरभयं उदकभयं गमनविघ्नं न भवति । हविषामुपधानं कुर्यात् । सू० ३ ।—यदि यानेन याति तदा इदं कर्म । सू० ४ ।—वाणिजद्रव्यं वस्त्राश्वादिसर्वद्रव्यं···विक्रयार्थं नयति। यदा द्रव्यं गृह्णाति तदा इदं कर्म । सू० ६ ।—अथाभ्यागतपुरुषाणां सांमनस्यं क्रियते । यदा विशिष्टो गृहे आगच्छति तदा इदं मैत्रीकर्म क्रियते । मित्रंस्वेषां दर्शनं आगतानां । यदा गृहे आगच्छति तदा इदं कुर्यात् । सू० ७ ।—हस्त्यादियानं सम्पाप्याभिमंत्र्य तस्मिन्याने यस्य सांमनस्यं क्रियते···उपरि उपविशंति । सर्वे यानस्योपरि चटन्ति ततः पश्चिमद्विशि गत्वा पुनर्गृहे आगच्छन्ति । ततः ओदनमभिमंत्र्य सह भुञ्जन्ति मन्थं वा । समाप्तं सांमनस्यं । एकस्मिन् युद्धे क्रियमाणे सहागतस्य कर्म इदं कर्म अन्यस्य च साधारणमित्यर्थः । यो युद्धे साहाय्यत्वं करोति तस्येदं कर्म । प्रथमं पादौ प्रक्षाल्य ततः कर्म चेति । क्षत्रिययोरिदं कर्म मन्यन्ते केचित् । सू० ८ ।—अथ गृहे विरुद्धे सति सांमनस्यमुच्यते । कर्त्तारण्ये गत्वा समिधो गृहीत्वा तूष्णीं गृहमागत्य···गृहमनुष्याणां सांमनस्यं भवति कलहनिवारणं । सू० ९ ।—अथ मंत्रब्राह्मणयोर्द्रव्यमिच्छति तस्येदं कर्म प्रतिगृहादि उच्यते । वेदपाठेन शास्त्रपाठेन अर्थोत्थापनमिच्छन्निदं करोति । समाप्तं वेदेन अर्थोत्थापने विघ्नशमनं । सू० १२-१७ अथ परिमोक्षविधिं वक्ष्यामः । गोदानिकतन्त्रमाज्यभागान्तं कृत्वा ततः शान्त्युदकं कृत्वाभिमंत्रयते । "अपोदिव्या" इति चतसृभिः । ततोऽभ्यातानादि परिदानान्तं कृत्वा । केचित् परिदानान्ते ततोऽभ्यातानं हुत्वा तत इदावत्सरायेति कल्पजैश्चतसृभिर्ऋग्भिराज्यं जुहुयात् । समिध आदधाति । वेदव्रतं कल्पव्रतं मृगारव्रतं विषासहिव्रतं यमव्रतं शिरोव्रतं अङ्गिरोव्रतं इत्येवमादिषु "इदावत्सराये"ति व्रतविसर्जनं व्रतश्रावणं च करोति । यत्र क्वचित् व्रतं वैदिकं लौकिकं च तत्र सर्वत्र व्रतादानं व्रतविसर्जनं च भवति विधानेन। शिरोव्रतादीनि नित्यानि—कृच्छ्रचान्द्रायणादीनि काम्यानि स्मृतिपुराणशास्त्रवेदविहितानि । तानि सर्वाणीत्येतेन विधानेन कर्त्तव्यानि । सू० १८—परिमोक्षानन्तरं त्रिरात्रं स्नानव्रतं चरेत् । सू० १९ ।—अथ पापलक्षणान्नी तस्याः

शान्तिरुच्यते । स्त्रीमुखं प्रत्यृचं प्रक्षालयति तस्या मुखं हस्तयोर्मंशकक्षिग्रुकशिरकौ अस्यानतिलकं ह्रस्वकेशादि पापलक्षणं सामुद्रिके स्त्रीलक्षणं व्याख्यातं । स्त्रियं पापलक्षणामभिषिञ्चति दक्षिणात् केशादारभ्य यावदुत्तरपार्श्वं ततः पापलक्षणं विनश्यति सू० २२ ।— अथ पापदर्शने शान्तिरुच्यते । दर्शनदोषो न भवति.। पुरुषस्य भाग्यकाले हरिणो यान्ति प्रदक्षिणाः अप्रदक्षिणेषु हरिणेषु अयं जपः पक्षिषु च । श्वानरुदिते काकरुदिते काकमैथुनेषु पुरुषस्य मैथुनेषु श्येनमैथुनदर्शने नग्नस्त्रीदर्शने नग्नपुरुषस्य नपुंसकस्य दर्शने । यत्र क्वचिदपशकुनाः पतिताः तत्र सर्वत्र अयं-जपः । श्रुतौ स्मृतौ पठिता अद्रष्टव्यास्तेषां सर्वेषां दर्शने अद्भुतानां दर्शनेष्वयं जपः कर्त्तव्यः । लोके यद्विरुद्धं अन्वीक्ष्य···अयं जपः । अपशकुनजपः समाप्तः । सू० २३— अथ पुरुषहवे अकार्यकरणेन विघ्नशमनकर्म उच्यते ।

कण्डिका ॥ ४३ ॥

सू० १ ।— पुनर्विघ्नशमनमुच्यते । पिशङ्गवर्णसूत्रे बद्ध्वा···अरलूमणिं सम्पात्याभिमन्त्र्य बध्नाति···विस्कन्ध विघ्नशमनोमणिः । स्पर्धमानस्य स्पर्धा विनश्यतीत्यर्थः । वेणुदण्डादीन् सम्पात्य ततः सूक्तेन विमृज्य धारयति ।···चित्रदण्डे ध्वजदण्डे चिन्हदण्डे । लकुटादिदण्डं सर्वं सम्पात्य···धारयति तस्य सर्पश्वङ्गि दंष्ट्रादि विघ्नं न भवति । आयुधं सम्पात्याभिमन्त्र्य विमृज्य सूक्तेन धारयति । सर्वशस्त्रसम्पातिते मायादिकं मायाजालयुद्धे निवारणं संग्रामे इन्द्रजालनिवारणं युद्धे विघ्नं न भवति शत्रुहवं निवारयति । शत्रवो गच्छन्ति । स्पर्धिमानं शत्रुं जयति हवं विनाशयति । सू० २ ।—विघ्नं गृहीतं पुरुषं धूपयति । यस्यारम्भा न सिध्यन्ति । सू० ३ ।—अथ भूमिशुद्धिं गृहं करिष्यमाणस्तस्येदं करोति । अथवा नवे गृहे श्येनयागः कर्तव्यः विकल्प इति भाष्यकारः । प्रथमतो वा श्येनयागो नवे वा गृहे । सू० ४ ।—अथ गृहप्रवेश उच्यते । वास्तुसंस्कार उच्यते । सू० ५ ।—ततः शान्त्युदकं करोति । मातलीं पूर्वं कृत्वा वास्तोष्पत्यादीनिचतुर्गणीं महाशान्तिं शान्त्युदके आवपते । ततो मातलीं कृत्वा ततः शान्त्युदकं समाप्यते । तेन भूमिं प्रोक्षयेत् । सू० ७ ।—अन्येषु स्थूणा गर्तेषु पार्श्वस्थितेषु प्रक्षिपति । सू० ८ ।— नीयमानां शालामनुमन्त्रयते । सू० ११ ।-दृढां कारयति शालाभूमिं । सू० १३ ।— द्वाभ्यां चरुं जुहोति । केचिदस्मिन्तन्त्रे यजूंषि यज्ञ इति । सू० १५ ।—वृद्धस्त्रियो-गीतमङ्गल्यादि कुर्वन्ति ब्राह्मणाः पुण्याहानि पठन्ति श्राद्धं च केचित्पश्चात्कुर्वन्ति । यत्र गृहं मण्डपं वा कुटीं वा चित्रशालां वा मठस्थानं वा देवगृहं वा अन्यं वा तृणमयं वा काष्ठमयं वा इष्टकामयं वा पाषाणमयं वा गृहादिकं करोति तत्रानेन विधानेन वास्तुयागः कर्तव्यः । सू० १६ ।-अथ क्रव्यादोपहतगृहे क्षेत्रे वान्यत्र गोष्ठे

वा यत्र क्वचित्तत्र शान्तिरुच्यते । क्रव्यादा प्रविष्टे गृहे कुमारा म्रियन्तेऽवत्सान् वा किशोरान् वा धननाशो यत्रभवति तद्गृहं ग्रामं नगरं वा क्रव्यादोपहतं जानीयात् । सू० १८ ।—पालाशसमिध आदधाति । सू० १९ ।—कुमारवत्सगोमरणादि धनधान्यविनाशादि चिन्तितोद्वेगादि क्रव्यादचिन्हानि । क्रव्यादोपहतशान्तिः समाप्ता । सू० २० ।—अथं क्रव्याच्छमनविधानमुच्यते । लौकिके वाग्नौ गृहे वावसथ्ये वा शान्तिकपौष्टिकार्थं मन्थने वा यत्र वा क्रव्यादोपहतिर्दृश्यते तत्र सर्वत्र कुर्यात् । सू० २१ । अथ वशाशमनविधानमुच्यते "ये अग्नय"इति दशर्चेन सूक्तेन वशामभिमन्त्र्य ततो ब्राह्मणाय ददाति । यस्य गृहे वशा भवति जायते तद्गृहं दैवहतं विजानीयात् ।

कण्डिका ॥ ४४ ॥

सू० १ ।— वशाशमनविधानमुच्यते । सू० ३ ।—शान्त्युदकं करोति अन्वारब्धायै वशायै काष्टेन तृणेन वा । सू० ५ ।—मातल्यन्तेन शान्त्युदकेनाचामयति च संप्रोक्षति च । सू० ६ ।—वशां कर्ता ऊर्ध्वस्थितः वास्तोष्पत्यादि चतुर्गृणीं महाशान्तिं उच्चैस्तृतीयसवने जपति वशाभिमुखः स्थितः । सू० १४ ।— समस्येति मन्त्रेण भूमौ कृत्वा तत उपरि वशां पातयति । सू० १५ ।—निरुच्छ्वासं करोति मारयतीति । सू० १७ ।—यद्वशेत्यृचा कल्पजया आज्यं जुहोति । सू० १९ ।—इति कर्त्ता ब्रूयात् । सू० २८ ।—शेषमुदकं पाश्चर्वदेशे निक्षिप्य ततोऽभ्यन्तरे प्रविश्य । सू० ३६ ।—छेदनस्थानमभिधार्यं ।

कण्डिका ॥ ४५ ॥

सू० ३ ।—अवदानानि पशोरेकादश गृह्णाति । सू० ४ ।—ततः स्विष्टकृदवदानानि गृह्णाति तानि त्रीणि दक्षिणो बाहुः वामजंघा च अन्त्रविभागं । एतानि त्रीणि भागानि । सू० ६ ।—ततो यदैवत्यः पशुस्तद्दैवत्यश्चरुः श्रपयितव्यः । सू० १२ ।—वपाश्रपण्यौ द्वे सह जुहोति । सू०१३ ।—अथ पित्र्येषु काम्येषु विशेषः । सू० १६ । —सम्राडिति मन्त्रेणाज्यं जुहोति सर्वंवोरायेत्यादि चतस्र आहुतीर्जुहोति । समाप्तं वशाशमनविधानं । दैवहतं तस्य गृहं यस्य गृहे वशा जायते तस्य धनादिनाशो भवति तस्माच्छान्तिः कर्तव्या । सू० १७ ।—अथ दुष्टे प्रतिग्रहे सौम्ये वा कृते याजने वा दक्षिणाप्रतिग्रहणे येन कर्मणा पापं विनश्यति तदुच्यते । प्रतिग्रहं प्रतिगृह्णाति प्रतिग्रहदोषो न भवति । सू० १८ ।— सर्वाणि कर्माणि कृत्वा "पुनर्मैत्विन्द्रिय"मित्यृचा कर्म समाप्य तत आत्मानमनुमन्त्रयते । सर्वकर्मसु भवति । इत्यात्मशान्तिः । सन्ध्यावन्दने आज्यतन्त्रे

अस्मिन् कर्मणि नित्यनैमित्तिककाम्येषु "पुनर्मैत्विन्द्रियमि"त्यृचा आत्महृदय-मनुमन्त्रयते । सू० १९ ।—एतेन विधानेन पशवो व्याख्याताः । नित्यनैमित्तिक-काम्याः । पैठीनसिना काम्याः पठिताः ।

कण्डिका ॥ ४६ ॥

सू० १ ।—अथ अकृते पापे लोके पापवचनमुत्पद्यते तत्र शान्तिरुच्यते । सक्तुमन्थं···भक्तमभिमन्त्र्य ददाति प्रथममग्रे कृत्वा अभ्याख्यातं गृहे प्रवेश्य कर्ता पश्चात्प्रविशति । सू० २ ।—द्रुघणमणिं सम्पात्याभिमन्त्र्य बध्नाति । सू० ३ ।—पलाशकाष्ठमणिं द्रुघणप्रतिरूपं कृत्वा अभिशस्ते बध्नाति । कृष्णलोहमणिं... ताम्रमयद्रुघणप्रतिरूपमणिं हिरण्यमणिं द्रुघणप्रतिरूपं बध्नाति । सर्वत्रकौशिके कर्मणां विकल्पः । एकस्मिन्विषये यत्र बहूनि कर्माणि पठितानि तत्रैकं कुर्यात् सर्वा-णि वा तन्त्रविकल्पः । सू० ४ । —अथ यागे क्रियमाणे येन कर्मणा विघ्नशमनं भवति तदुच्यते । ऋत्विजो यजमानश्चाशयन्ति अविघ्नेन यज्ञसिद्धिर्भवति । सू० ५ ।—यागसमाप्तौ विघ्नशमनमुच्यते । सोमदेवत्यं चरुं जुहोति । सू० ६ ।—अथ धनधान्यादि प्रतिग्रहादियाचनामिच्छन्निदं कृत्वा याचित-विघातो न भवति । याचितं न प्रतिषेधयति । सारूपवत्सं पायसं सम्पात्याभि-मन्त्र्याश्नाति । सू० ७ ।—अथ कपोते उलूके वा गृहं प्रविष्टे अन्यत्राभीष्टदेशेऽपि तत्र शान्तिरुच्यते । शान्त्युदके आवपते ततो मातलिं कृत्वा शान्त्युदकं समाप्यते रात्रौ तेन शान्त्युदकेन तत्स्थानं प्रोक्षति "यतायै" इत्येतैर्मन्त्रैः कपोतोलूक-स्थानं यावत् । सू० ८ ।—त्रिः शालां परिणयति कपोतस्थानं वा परिभ्रामयेत् । आरण्यके पक्षिणि प्रविष्टे इदं कर्म कुर्यात् । कपोतोलूके वा प्रविष्टे द्विपदचतुष्प-दविनाशो वेदे श्रूयते तस्य दोषशमनम् ॥ सू० ९ ।—

अथ स्वप्नाध्याये पठिते उग्रे स्वप्नदर्शने शान्तिरुच्यते । स्वप्नाध्यायपठितदुःस्वप्नं च रुद्रभाष्यकारमतेन गृहीतव्यं । पक्वमांसे प्रेतदर्शने परिष्वङ्गमर्कटे दृष्ट्वा तैलाभ्यङ्गे नग्नपुरुषदर्शने नग्नस्त्रीदर्शने कालसूत्रे इत्यादि स्वप्नाध्यायपठिता अनेकशः । इति दुःस्वप्नदर्शने शान्तिरुच्यते । स्वप्नं कुत्सितं दृष्ट्वा मुखं प्रक्षालयति ॥ सू० १३ ।—अथ पुनर्घोरदुःस्वप्ननाशनकर्म उच्यते । "विद्मा ते" स्वप्ने इत्येकेन पर्यायेण दुःस्वप्नं दृष्ट्वा मुखं विमार्ष्टि ।··· पार्श्वेन द्वितीयेन भूयते । अन्नं स्वप्ने दृष्ट्वा निरीक्षते । मैश्रधान्यं पुरोडाशं जुहोति । सू० १४ ।—अथ आचार्ये मृते ब्रह्मचारी इदं करोति । श्रेयस्कामः आचार्यदहने । अग्नेर्भूम्यामित्यादि पञ्च सामिधेनी हुत्वा ततो दहनं त्रिर्भ्रामयित्वा तत "नहि ते अग्ने तन्व" इति सूक्तान्ते पुरोडाशं जुहोति तस्मिन्दहने ॥ सू० १६ ।—कौशिकसूत्रे शयनं न मन्यते च प्रेतादिभयात् तद्विघातशमनं । सू० २७ ।—"अपो दिव्या"इति चतसृभिर्ऋग्भिः स्नानं कृत्वा

त्रिरात्रं गृहे आगत्य ततः शयीत इति कौशिकमतं । मृते आचार्ये इदं कर्म प्रायश्चित्तं कृत्वा ततः समावर्त्तनं कुर्यादित्यर्थः । अन्यं गुरुमुपासीत । सू० १९ । अथ ब्रह्मचारी स्त्रिया मैथुनसंयोगे इदं करोति । स अवकीर्णीत्युच्यते । तस्य प्रायश्चित्तमिदमुच्यते । ब्रह्मचारिणं दर्भैरज्ज्वा कण्ठे बद्ध्वा । सू० २२ ।—अथ स्वयं प्रज्ज्वालिते अग्नौ प्रायश्चित्तमुच्यते । सू० २३ ।—अथ अग्निशब्दकरणे शान्तिरुच्यते । अग्निमुपतिष्ठते ॥ ९४ ॥ अथ संदेशे विस्मृते···अग्निमुपतिष्ठते । यदि ग्रामे वा गृहे वा संदेशं न कथयति तदा इदं प्रायश्चितं ॥ सू० २५–अथ पापनक्षत्रे जाते स्त्री वा पुरुषो वा यो जातस्तस्य शान्तिरुच्यते । तस्य मुञ्जरज्ज्वा कण्ठे पादे बद्ध्वा ततः "प्रत्नोही"ति–सूक्तेन उदकघटं सम्पात्याभिमंत्र्य दर्भैपिञ्जुलीर्घटे प्रक्षिप्य ततोऽभिषिञ्चति ।···ग्रीवा पाशं नदीफेनेषु निदधाति । नदीनां फेनानित्यर्धर्चेन कटिपाशं उदकमध्ये प्रक्षिपति । मातृपितृभ्रातृषु दोषः श्रवणात् । तस्मात् पापनक्षत्रेण शान्तिः कर्तव्या । मूलनक्षत्रे इदं कर्म क्रियते । यो नक्षत्रकल्पोक्तं कर्म कुर्यात् । तदुच्यते । "प्रत्नो ही"ति सूक्तेन क्षीरौदनं सम्पात्याभिमंत्र्याश्नाति । एतस्मिन् तंत्रे समूलं बर्हिस्तृणाति समूलेध्मानुपसमाधाय एष विशेषः । नक्षत्रकल्पोक्तं । एषा नक्षत्रकल्पोक्ता शान्तिः । आप्लवनावसेचने च क्षीरौदनं च प्राशनं एतानि त्रीणि । अथवा "प्रत्नो ही"ति सूक्तेन उदकमभिमंत्र्य पापनक्षत्रजातमवसिञ्चति शिरसि एतानि त्रीणि कर्माणि भवन्ति ॥सू०२६।–अथ ज्येष्ठे भ्रातरि जीवति विवाह आधानं दीक्षां च करोति तस्य शान्तिरुच्यते ॥ सू० २८।—उत्तरपाशं नदीनां फेनानित्यर्धर्चेन नदीफेने निदधाति ॥ अधरपाशं नदीमध्ये प्रक्षिपति । ततो बन्धनं कृत्वा ततोऽवसिंचति ॥ सू०२९।-अपां सूक्तैर्घटं सम्पात्याभिमंत्र्य तत आप्लावयति । अवसिंचति । परिवित्ति परिवेत्तृ प्रायश्चित्तं । सू० ३०–अथ मृते आचार्ये इदं कर्म । सू० ३३—अथ देवपितृवर्जितखदाशयनिहितस्य अन्नस्य याज्ञाकेन येन कर्मणा भवति तदुच्यते । अनुवाकेन खदाशयादन्नादुद्धृत्य सेतिकामेकां जुहोति । सू० ३४—प्रायश्चित्तम् । सू० ३५–खदाशयान्नसंस्कारशान्तिः समाप्ता । सू० ३६–अथ मृते धनिके ऋणकस्य ऋणदानशान्तिरुच्यते । अपमित्यमप्रतीत्तमिति त्रिभिः सूक्तैर्द्रव्यमभिमंत्र्य पुत्राय ददाति । अनृणो भवति । सू० ४१–आकाशोदकेन शरीराप्लवने दोषो भवति तस्य शान्तिरुच्यते ॥ सू० ४२ ।—"दिवो नु मां बृहत" इति सूक्तेन एकतैलं सर्वौषधिगन्धं हिरण्यं वा एतान्यभिमंत्र्य शरीरमुद्वर्तयेत् ॥ आकाशबिन्दुदोषोपशान्तिः समाप्ता । सू० ४३ । —अथ कुमारस्य कुमार्या वा यस्योत्तमदन्तौ पूर्वौ जातौ तस्य मातापित्रोर्मरणशङ्का भवति तत्र शान्तिरुच्यते । सू० ४४ ।—व्रीहियवतिलमाषानेकीकृत्याभिमन्त्र्य उत्तमजातदन्ताभ्यां दंशयति । सू० ४७ ।—अथ शिरसि अङ्गे वा काकोपविष्टे दोषः श्रूयते तस्य शान्तिरुच्यते । ४८ ।—

उल्मुकमभिमन्त्र्य काकमुखेन अपमृष्टं पुरुषं पर्यग्निकरोति। उपरि शमयित्वा दूरे निक्षिपति। ४९।—अथ संसर्गदोषशान्तिरुच्यते। सर्वेषु रोगेषु शावदन्तादि कुनखिनावण्डेन ज्वरेणापामार्गादिरोगेषु संसर्गेषु सर्वदोषान्मुच्यते। सू० ५०।—अनृतमुक्त्वाचमनं करोति। वणिजि अनृतं कृत्वा दोषो न भवति। सू० ५१।—यत्र क्वचित् खनति तत्र सर्वत्र "यत्ते भूम" इति। खननदोषो न भवति। सू० ५३।—अथ शकुनशान्तिरुच्यते। अपशब्दं श्रुत्वा कपिञ्जलवाशितं श्रुत्वा ग्रामे अरण्ये पक्षिवाशितं श्रुत्वा वा स्वयं वा क्रुद्धभाषणं कृत्वा अन्यस्य वचनं श्रुत्वा—उलूकवाशने कपोतवाशने पूर्वतो वा उत्तरतो वा लोके निन्दितः। यत्किंचिल्लोके विरुद्धं दृष्ट्वा श्रुत्वा सर्वत्र जपने स्वस्त्ययनं भवति। सू० ५५—आकाशे यदि स्वपिति अरण्ये वा शून्ये गृहे वा पर्वते वा तदा तदा "यो अभ्य बभ्रूण" इत्यृचं जपित्वा स्वपिति। समाप्तानि नैमित्तिकानि सर्वज्ञानप्रबोधनार्थं...दुष्टदोषविनाशनैमित्तिकानि। नैमित्तिकान्यवश्यं कर्तव्यानि। अकरणे धनधान्यपश्वादिविनाशः। "जरायुज" इति दुर्दिनमायस्त्रित्यादीनि। अथाद्भुतानि वर्षे यक्षेष्वादिनैमित्तिकानि तानि अवश्यं कार्याणि।

इति पञ्चमोऽध्यायः ॥ ५ ॥

कण्डिका ॥ ४७ ॥

क्रमप्राप्तो अथर्ववेदविहितोऽभिचार उच्यते। मीमांसायामभिचारो निषिद्धः। मनुस्मृतौ च विहितोऽभिचारः। सू० २।—आङ्गिरसकल्पोक्ताः संभाराः प्रत्येतव्याः। दक्षिणस्यां दिशि मण्डपं, कारयेत्तत्र यथोक्तविधिना गुरुः। पताकातोरणैर्युक्तं द्वारं...स्मृतम्। सू० ९। तथा तदग्र इत्यादि स्मर्त्तव्यं सर्वत्र। अभ्यातानान्ते "दूष्या दूषिरसी"ति सूक्तेन तिलकमणिं सम्पात्याभिमन्त्र्य बध्नाति कारयिता कर्त्ता सदस्यश्च...आत्मरक्षार्थम्। सू० १२—अधुना दीक्षा उच्यते शुक्लपक्षे त्रयोदश्यां पूर्वाण्हे अभ्यातानान्तं कृत्वा "द्यावापृथिवी उर्वन्तरिक्षमि"ति सूक्तं कर्त्ता "कनक रजतेति" सूक्तं द्वाभ्यां सूक्ताभ्यां वेणुदण्डं छिनत्ति। सू० १४–१६। य इमां देवो मेखला"मिति पञ्चर्चेति सूक्तेन। मेखलां सम्पात्य। "अयं वज्र इति" सूक्तेन दण्डं सम्पात्य। "य इमा"मित्यृचेन मेखलां बध्नाति। "वज्रो"सीति तृचेन सूक्तेन दण्डं गृह्णाति। "नमो नमस्कृद्भ्य"इति सप्तर्षिभ्य उपस्थानं करोति शालाया बहिः। ततः शालां प्रविश्य व्रतादानीयाः समिध आदधाति शान्ताः। व्रतश्रावणं तस्मिन् करोति। अभ्यातानामुत्तरतन्त्रम्। दीक्षितस्त्रिरात्रमनशनं। त्रिरात्रे निवृत्ते कृष्णपक्षे प्रतिपदि कर्म भविष्यति। सू० १७।—आङ्गिरसदण्ड वृश्चन सूक्तं प्रतिपादन उक्तं गृहीत्वा मेखलाया ग्रन्थिमालिम्पति "आहुतास्यभिहुता"इत्यृचा। सू०

१६-२०।—"अयं वज्र"-इति तिसृभिर्ऋग्भिः "यदश्नामि यत्पिरामि-"इति द्वाभ्यां ऋग्भ्यां भोजनं करोति "यत्पिबामी" त्यृचा उदकं पिबति। अमुष्यस्थाने शत्रुनाम ग्रहणं—। सू० २१।—फड्डतो मधुमद इत्येतेन मन्त्रेण भोजनपात्रं भिनत्ति। सू० २२।—"इदमहं मधुमदस्य तुरुष्कस्य मूतिकर्णपुत्रस्य प्राणापानावपयच्छा"मीत्यनेन मन्त्रेण मेखलां ग्रन्थ्या बध्नाति गाढं करोति। सू० २५-२७। -"द्यावापृथिवी उर्विति" सूक्तेन पशुंवृक्षपत्रं च गृहीत्वा शत्रोर्दक्षिणा धावतः पदं ऋजुं छिनत्ति। तिरश्चीनत्रिकोणे एकैकं एवमष्टावरान् सूक्तावृत्तिः। सू० २८।—तस्माच्छेदात्पांसुं च गृहीत्वा वधपत्रे बद्ध्वा···अष्ट्रे न्यस्यति। सू० ३०।—अथवा एतत्···अभिचारतन्त्रमुच्यते। पश्चादग्नेः करिष्यां कूष्मुपस्तीर्णायां। सू० ३१।—उदकं हस्ते कृत्वा दक्षिणामुखः प्रक्षिपति। सू० ३२-३३।—इदं च उष्णोदकमध्ये अक्षितसक्तून् प्रक्षिप्य पिबेत् अनालोड्यानेकोच्छ्वासेन। सू० ३४-३६।—"त्रीस्त्रीन्मुष्टी"स्त्रिरात्रं द्वौ द्वौ त्रिरात्रमेकैकं षड्रात्रे भुंक्ते "आहुतास्यभिहुते"त्येवमादि स्मर्त्तव्यं। सू० ३७।—ब्राह्मणान्परिचारकांश्च भोजयित्वा पात्रस्थितमुच्छिष्टमेकधा कृत्वा बहुमस्त्ये गर्त्ते प्रक्षिपेत्। सू० ३८।—यदि ते धावन्तो दृश्यन्ते ततो द्वेष्यो मृतो जानीयात्। सू० ३९-४२।—"द्यावा पृथिवी"इति सूक्तेन लोहितशिरसं शशकमाशयित्वा। प्रेतवत् कृत्वा अभिमन्त्र्य दहति ततः "अग्ने यत्ते तप"इति पञ्चभिः सूक्तैरुपतिष्ठते। अन्यः कर्ता अभ्यातानान्तं कृत्वा कृकलासमष्टधा कृत्वा प्रत्यृचं जुहोति। सू० ४४।—निवृत्य वेद्यामुपवेश्य···स्वेदाक्ताः शरभृष्टीः प्रत्यृचं जुहोति। सू० ४५।—शत्रुपदात्पांसुं गृहीत्वा पश्चादग्नेर्निधाय उदग् व्रजत्यास्वेदजननात्। निवृत्य स्वेदालङ्कृतान्पांसून्···जुहोति। सू० ४६-५२।—कृकलासशरीरे शर्करानवधाय विषमवधाय···बध्नाति "पाशेस" इति पादेन। "आमु"मित्यादत्ते। मर्मणि खादिरेण स्रुवेण गर्तं खनति "अतीव य"इति तत्र निदधाति। सू०५३।—संचित्य मृत्तिकोपरि निदधाति "द्यावापृथिवी"इति सूक्तेन जुहोति। सू० ५४।—"द्यावापृथिवी" इति सूक्तेन आवलेखनीं हृदये विध्यति·····सू० ५७।—शत्रुमारणकामः।

कण्डिका ॥ ४८ ॥

सू० १।—अश्वत्थ···कृकलास···एरण्ड···श्लेष्मान्तक···खदिर···शरसमिध आदधाति। सू० ३।—स्रुवाग्रे दण्डं बध्नाति। सू० ४।—शत्रुमर्मणि निखनति···सू० ५।—तौ अश्वत्थशाखायां प्रणुदति। सू० ६।—यावन्तः सपत्नास्तावन्तः पाशान्···उदके प्लावयति। सू० ७।—शत्रुकोशं तमन्वाह मरणं भवति। सू० ८।—उपसमाधानं। ···स्रुवग्रहणं। ···जुहोति···सू० ९।—कृकलासकर्म

